जैनकथाद्वाविंशतिः

सोलापुरस्थेनफडकुले इत्युपा-
ह्वयेन पासू गोपाळशर्मणा

मुंबय्यां

" निर्णयसागर " मुद्रालये प्रकाशिता.

संवत् १९६३.

उपोद्घातः ॥

श्रीमत्स्वामिसमंतभद्रविरचितो रत्नकरंडनामोपासकाध्ययनग्रंथो वर्तते सः प्रभाचंद्राचार्यैः प्रणीतया टीकयालंकृतस्तस्यां टीकायामेताः कथा उदाहृता दृश्यंते मूलग्रंथेऽपि एता नामनिर्दिष्टा आचार्यैस्तु विस्तरतो वर्णिताः ।

संस्कृतपाठशालायां आंग्लपाठशालायां वा गीर्वाणभाषाजिज्ञासूनां छात्राणां संस्कृतभाषाज्ञानधर्मबोधयोर्युगपल्लाभार्थं संपादकेनैता मुद्रयित्वा प्रसिद्धिं नीताः । अस्मिन् ग्रंथे अशुद्धदोषो यत्नेन वर्जितस्तथापि ये केचन प्रमादावशिष्टाः स्युस्ते सुज्ञैर्ज्ञापयितव्याः येनांतरस्मिन् प्रकाशनकाले तान् परिहर्तुं यतिष्यामहे । बहुषु जैनकाव्यप्रबंधेषु यद्यप्येता पद्यविरचितास्तथापि नवीनछात्राणां सुलभबोधार्थमस्माभिर्गद्यात्मिकैव प्रकाशिताः ।

सोलापूर जैनपाठशालाध्यापकाः

कथा १.

निःशंकितत्वेंगेऽजनचोरदृष्टांतस्तस्य कथा।

यथा धन्वंतरिविविशालोमौ स्वकृतकर्मवशादमितप्रभवि-द्युत्प्रभदेवौ संजातौ चान्योन्यस्य धर्मपरीक्षणार्थमत्रायातौ। ततो जमदग्निस्ताभ्यां तपसश्चालितः। अंगदेशे राजगृहनगरे जिनदत्तश्रेष्ठी कृष्णचतुर्दश्यां रात्रौ स्मशाने कायोत्सर्गे-स्थितो दृष्टः। ततोऽमितप्रभदेवेनोक्तं। दूरे तिष्ठंतु मदीया मुनयोऽमुं गृहस्थं ध्यानाच्चालयेति ततो विद्युत्प्रभदेवेनानेन यथा कृतोपसर्गोपि न चलितो ध्यानात्। ततः प्रभाते मा-यामुपसंहृत्य प्रशस्य चाकाशगामिनी विद्या दत्ता। तस्मै कथितं च तवेयं सिद्धाऽन्यस्य च पंचनमस्कारार्चनाराधन-विधिना सेत्स्यतीति। सोमदत्तपुष्पबटुकेन चैकदा जिनदत्त-श्रेष्ठी पृष्टः क्व भवान् प्रातरेवोत्थाय व्रजतीति। तेनोक्त-मकृत्रिमचैत्यालयवंदनभक्तिं कर्तुं व्रजामि। ममेत्थं विद्या-लाभः संजात इति कथिते तेनोक्तं। मम विद्यां देहि येन त्वया सह पुष्पादिकं गृहीत्वा वंदनाभक्तिं करोमीति। ततः श्रेष्ठिना तस्योपदेशो दत्तः। तेन च कृष्णचतुर्दश्यां स्मशाने वटवृक्षपूर्वशाखायामष्टोत्तरपादं दर्भशिक्यं बंधयित्वा तस्य तले तीक्ष्णशस्त्राण्यूर्ध्वमुखानि स्थापयित्वा। गंधपुष्पादिकं दत्त्वा शिक्यमध्ये प्रविश्य षष्ठोपवासे पंचनमस्कारमुच्चार्य

छुरिकयैकैकं पादं छिंदताऽधो जाज्वल्यमानप्रहरणसमूह-मालोक्य भीतेन तेन संचिंतितं । यदि श्रेष्ठिनो वचनमसत्यं भवति । तदा मरणं भवतीति । शंकितमना वारंवारं चटनोत्तरणं करोति । एतस्मिन् प्रस्तावे प्रजापालराज्ञः कनका राज्ञी हारं दृष्ट्वांजनसुंदर्या विलासिन्या रात्रावागतोंजनचोरो भणितः । यदि मे कनकहारं ददासि तदा भर्त्ता त्वं । नान्यथेति । ततो गत्वा रात्रौ हारं चोरयित्वांऽजनचोर आगच्छत् । हारोद्योतेन ज्ञातोंगरक्षैः कोट्टपालैश्च ग्रहीष्यमाणः हारं त्यक्त्वा प्रणश्य गतो वटतले बटुकं दृष्ट्वा तस्मान्मंत्रं गृहीत्वा निःशंकितेन तेन विधिनैकवारेण सर्वेशिक्यं छिन्नं शस्त्रोपरि पतितः सिद्धया विद्यया भणितमादेशं देहीति । तेनोक्तं । जिनदत्तश्रेष्ठिपार्श्वे मां नयेति । ततः सुदर्शनमेरुचैत्यालये जिनदत्तस्याग्रे नीत्वा धृतः । पूर्ववृत्तांतं कथयित्वा तेन भणितं । यथेयं सिद्धा विद्या भवदुपदेशेन तथा परलोकसिद्धावप्युपदेशमादेहीति । ततश्चारणमुनिसन्निधौ तपो गृहीत्वा कैलासे केवलमुत्पाद्य मोक्षं गतः ।

कथा २.

निःकांक्षितत्वेऽनंतमतिदृष्टांतस्तत्कथा ।

अंगदेशे चंपानगर्यां राजा वसुवर्धनो राज्ञी लक्ष्मीमती श्रेष्ठी प्रियदत्तस्तद्भार्या अंगवती । पुत्र्यनंतमती नंदीश्वराष्टम्यां श्रेष्ठिना धर्मकीर्त्याचार्यपदमूलेऽष्टदिनानि ब्रह्मचर्यं गृहीतं ।

क्रीडयाऽनंतमती तद्व्रतं च ग्राहिता । अन्यदा संप्रदानकालेऽनंतमत्योक्तं । तात मम त्वया ब्रह्मचर्यं दापितमतः किं विवाहेन । श्रेष्ठिनोक्तं क्रीडया मया ते ब्रह्मचर्यं दापितं । ननु तात, धर्मे व्रते का क्रीडा । ननु पुत्रि नंदीश्वराष्टदिनान्येव व्रतं तदा ते दत्तं । सोवाच न तथा भट्टारकैरविवक्षितत्वात् इति । इह जन्मनि परिणयने मम निवृत्तिरस्तीत्युक्त्वा सकलकलाविज्ञानाशामकुर्वती स्थिता यौवनभरे चैत्रे निजोद्याने आंदोलयंती । दक्षिणश्रेणिकिन्नरपुरविद्याधरराजेन कुंडलमंडितनाम्ना सुकेश्या निजभार्यया सह गगनतले गच्छता दृष्ट्वा किमऽनया विना जीवितेनेति संचिंत्य भार्यां गृहे स्थापयित्वा शीघ्रमागत्य विलपंती तेन सा नीता । आकाशे गच्छता भार्यां दृष्ट्वा भीतेन पर्णलघुविद्यायाः समर्प्य महाटव्यां मुक्ता । तत्र च तां रुदंतीमालोक्य भीमनाम्ना भिल्लराजेन निजपल्लिकायां नीत्वा प्रधानराज्ञीपदं ददामीमामिति भणित्वा रात्रावनिच्छंतीं भोक्तुमारब्धः व्रतमाहात्म्येन वनदेवतया तस्य ताडनाद्युपसर्गः कृतः । देवता काचिदियमिति भीतेनावासितसार्थपुष्पकनाम्नः सार्थवाहस्य समर्पिता । सार्थवाहो लोभं दर्शयित्वा परिणेतुकामो न तया वांछितः । तेन चानीयायोध्यायां कामसेनकुट्टिन्याः समर्पिता । कथमपि वेश्या न जाता । ततस्तया सिंहराजस्य दर्शिता । तेन रात्रौ हठात् सेवितुमारब्धा । नगरदेवतया तद्व्रतमाहात्म्येन तस्योपसर्गः कृतः । तेन च भीतेन गृहान्निःसारिता रुदंती

सखेदं कमलश्रीकंतिकया श्राविकेति मत्वाऽतिगौरवेणादृता। अथानंतमतिशोकविस्मरणार्थं प्रियदत्तश्रेष्ठी बहुसहायो वंदनाभक्तिं कुर्वन्नयोध्यायां गतो निजशालकजिनदत्तश्रेष्ठिनो गृहे संध्यासमये प्रविश्य रात्रौ पुत्रीहरणवार्तां कथितवान्। प्रभाते तस्मिन् वंदनाभक्तिं कृतवति सति गौरविकप्राघूर्ण्यैकनिमित्तं रसवतीं कर्तुं चतुष्कं दातुं कुशला कमलश्रीकंतिका श्राविकाजिनदत्तभार्यया आकारिता। सा च सर्वं कृत्वावसतिकां गता। वंदनाभक्तिं कृत्वा आगतेन प्रियदत्तश्रेष्ठिना चतुष्कमालोक्यानंतमतिं स्मृत्वा गद्गदितहृदयेन गद्गदितवचनेनाश्रुपातं कुर्वता भणितं। यया गृहमंडनं कृतं तां मे दर्शयेति। ततः सा आनीता तयोश्च मेलापको जातो जिनदत्तश्रेष्ठिना च महोत्सवः कृतः। अनंतमत्या चोक्तं तात इदानीं मे तपो दापय। दृष्टमेकस्मिन्नेव भवे संसारवैचित्र्यमिति। ततः सकलश्रीकंतिकापार्श्वे तपो गृहीत्वा बहुना कालेन विधिना मृत्वा तदात्मा सहस्रारदेवो जातः ॥२॥

कथा ३.

निर्विचिकित्सितत्व उद्दायनो दृष्टांतोऽस्य कथा।

सौधर्मेंद्रेण निजसभायां सम्यक्त्वगुणं व्यावर्णयता भरते कच्छदेशे रोरकपुरे उद्दायनमहाराजस्य निर्विचिकित्सिता गुणाः प्रशस्तास्तं परीक्षितुं वासवदेव उदुंबरकुष्टकुथितं मुनिरूपं विकृत्य तस्यैव हस्तेन विधिना स्थित्वा सर्वमाहारजलं

च मायया भक्षयित्वातिदुर्गंधं बहुवमनं कृतवान् । दुर्गंधभयान्नष्टे परिजने प्रतिष्ठनो राज्ञस्तद्देव्याश्च प्रभावत्या उपरि छर्दितं हाहा विरुद्ध आहारो दत्तो मयेत्यात्मानं निंदयतस्तं च क्षालयतः मायां परिहृत्य प्रकटीभूय पूर्ववृत्तांतं कथयित्वा प्रशस्य च स्वर्गं गतः प्रभावती तपसा ब्रह्मस्वर्गे देवो बभूव ॥ ३ ॥

कथा ४.

अमूढदृष्टित्वे रेवतीदृष्टांतोऽस्याः कथा ।

विजयार्धदक्षिणश्रेण्यां मेघकूटनगरे राजा चंद्रप्रभश्चंद्रशेखराय राज्यं दत्वा परोपकारार्थं वंदनाभक्त्यर्थं कियतीं विद्यां दधानो दक्षिणमथुरायां गत्वा गुप्ताचार्यसमीपे क्षुल्लको जातः तेनैकदा वंदनाभक्त्यर्थमुत्तरमथुरायां चलितेन गुप्ताचार्यः पृष्टः किं कस्य कथ्यते । भगवतोक्तं सुव्रतमुनेर्वंदना वरुणराजमहाराज्ञ्या रेवत्या आशीर्वादश्च कथनीयः त्रिःपृष्टेनाप्येतदेवोक्तं । ततः क्षुल्लकेनोक्तं । भव्यसेनाचार्यस्यैकादशांगं धारिणोऽन्येषां च नामापि भगवान्न गृह्णाति । तत्र किंचित्कारणं भविष्यतीति । संप्रधार्य तत्र गत्वा सुव्रतमुनेर्भट्टारकीयां वंदनां कथयित्वा तदीयं विशिष्टं वात्सल्यं दृष्ट्वा भव्यसेनवसतिकां गतस्तत्र गतस्य भव्यसेनेन संभाषणमपि न कृतं । कुंडिकां गृहीत्वा भव्यसेनेन सह बहिर्भूमिं गत्वा विकुर्वणया हरितकोमलतृणांकुरच्छन्नो मार्गो दर्शितः । तं दृष्ट्वा

आगमे किल ते जीवाः कथ्यंते । इति भणित्वा तत्रारुचिं कृत्वा तृणोपरिगतः शौचसमये कुंडिकाजलं शोषयित्वा क्षुल्लकेनोक्तं भगवन् कुंडिकायां जलं नास्ति तथा विकृतिश्च कापि न दृश्यते । अतोऽत्र स्वच्छसरोवरे प्रशस्तमृत्तिकया शौचं कुरु ततोत्रापि तथा भणित्वा शौचं कृतवान् ततस्तं मिथ्यादृष्टिं ज्ञात्वा भव्यसेनस्याभव्यसेन इति नाम कृतं । ततोऽन्यस्मिन् दिने पूर्वस्यां दिशि पद्मासनस्थं चतुर्मुखं यज्ञोपवीताद्युपेतं देवासुरवंद्यमानं ब्रह्मरूपं दर्शितं । तत्र राजादयो भव्यसेनादयश्च गताः । रेवतीकोयं ब्रह्मनामदेव इति भणित्वा लोकैः प्रेर्यमाणापि न गता एवं दक्षिणस्यां दिशि गरुडारूढचतुर्भुजं चक्रगदाशंखादिधारकं वासुदेव-रूपं दर्शितं । पश्चिमायां दिशि वृषभारूढं सार्धचंद्रं जटा-जूटगौरीगणोपेतं शंकररूपं । उत्तरस्यां दिशि समवसरण-मध्ये प्रातिहार्याष्टकोपेतं सुरनरविद्याधरमुनिवृंदवंद्यमानपर्यं-कस्थं तीर्थंकररूपं दर्शितं । तत्र च सर्वे लोका गताः । रेवती तु लोकैः प्रेर्यमाणापि न गता नवैव वासुदेवाः एकादशैव रुद्राः चतुर्विंशतिरेव तीर्थंकराः जिनागमे कथिताः ते चातीताः कोप्ययं मायावीत्युक्त्वा स्थिता अन्यदिने चर्या-वेलायां व्याधिक्षीणशरीरक्षुल्लकरूपेण रेवतीगृहसमीपप्रतो-लिमार्गे मायामूर्च्छया पतितः रेवत्या तमाकर्ण्य भक्त्योत्थाप्य नीत्वादरं कृत्वा पथ्यं कारयितुमारब्धः तेन सर्वमाहारं भुक्त्वा दुर्गंधवमनं कृतं तदपनीय हाविरूपकं मयापथ्यं

दत्तमिति रेवत्या वचनमाकर्ण्य तोषान्मायामुपसंहृत्य तं देवं वंदयित्वा गुरोराशीर्वादं पूर्ववृत्तांतं च कथयित्वा लोकमध्येऽमूढदृष्टित्वं तस्या उच्चैः प्रशस्य स्वस्थानं गतः वरुणराजा नयकीर्तिपुत्राय राज्यं दत्वा तपो गृहीत्वा माहेंद्रस्वर्गे देवो जातः रेवत्यपि तपः कृत्वा ब्रह्मस्वर्गे देवो बभूव ॥ ४ ॥

कथा ५

उपगूहने जिनेंद्रभक्तो दृष्टांतोऽस्य कथा ।

सौराष्ट्रदेशे पाटलिपुत्रनगरे राजा यशोध्वजो राज्ञी सुसीमा पुत्रः सुवीरः सप्तव्यसनाभिभूतस्तथाभूतः शूरपुरुषसेवितः अस्ति । पूर्वदेशे गौडविषये तामलिप्तनगर्यां जिनेंद्रभक्तश्रेष्ठिनः सप्ततलप्रासादोपरि बहुरक्षयुक्तपार्श्वनाथप्रतिमा आसीच्छत्रत्रयोपरि विशिष्टतरवैडूर्यमणिं पारंपर्येणाकर्ण्य लोभात् सुवीरेण निजपुरुषाः पृष्टाः । तं मणिं कोप्यानेतुं शक्नोतीति । इंद्रमुकुटमप्यहमानयामीति गलगर्जितं कृत्वा सूर्य्यनामचोरो क्षुल्लको भूत्वातिकायक्लेशेन ग्रामनगरेषु क्षोभं कुर्वाणः क्रमेण तामलिप्तनगरीं गतः । तमाकर्ण्य आलोक्य वंदित्वा संभाष्य प्रशस्य च क्षुभितेन जिनेंद्रभक्तश्रेष्ठिना नीत्वा पार्श्वनाथं देवं दर्शयित्वा माययानिच्छन्नपि स तत्र मणिरक्षको धृतः । एकदा क्षुल्लकं पृष्ट्वा श्रेष्ठी समुद्रयात्रां चलितो नगराद्बहिर्निर्गत्य स्थितः । स चोरः क्षुल्लको गृहजनमुपकरणानयनव्यग्रं ज्ञात्वार्धरात्रौ तं मणिं गृहीत्वा चलितः । मणितेजसा

मार्गे कोट्टपालैर्दृष्टो धर्तुमारब्धः तेभ्यः पलायितुमसमर्थः श्रेष्ठिन एव शरणं प्रविष्टो मां रक्ष रक्षेति चोक्तवान् कोट्टपालानां कलकलमाकर्ण्य पर्यालोच्य तं चोरं ज्ञात्वा दर्शनापवादप्रच्छादनार्थं भणितं श्रेष्ठिना मद्वचनेन रत्नमनेनानीतमिति। विरूपकं भवद्भिः कृतं यदस्य महातपस्विनश्चोरघोषणा कृता ततस्ते तस्य प्रणामं कृत्वा गताः स च श्रेष्ठिना रात्रौ निर्द्धाटितः स श्रेष्ठी वैराग्यं प्राप्य दीक्षां गृहीत्वा तपस्तप्त्वा स्वर्गं गतः एवमन्येनापि सम्यग्दृष्टिना भक्तासमर्थाज्ञानपुरुषादागतदर्शनदोषस्य प्रच्छादकं कर्तव्यं ॥ ५ ॥

कथा ६.

स्थितिकरणे वारिषेणो दृष्टांतोऽस्य कथा ।

मगधदेशे राजगृहनगरे राजा श्रेणिको राज्ञी चेलिनी पुत्रो वारिषेण उत्तमश्रावकश्चतुर्दश्यां रात्रौ कृतोपवासः स्मशाने कायोत्सर्गेण स्थितः। तस्मिन्नेव दिने उद्यानिकायां गतया मगधसुंदरीविलासिन्या श्रीकीर्तिश्रेष्ठिना परिहितो दिव्यो हारो दृष्टः। ततस्तं दृष्ट्वा किमनेनालंकारेण विना जीवितेनेति संचित्य शय्यायां पतित्वा सा स्थिता। रात्रौ समागतेन विद्युच्चोरेणोक्तं प्रिये किमेवं स्थितासीति। तयोक्तं श्रीकीर्त्तिश्रेष्ठिनो हारं यदि मे ददासि तदा जीवामि त्वं च मे भर्त्ता नान्यथेति। मत्वा तां समुद्दिश्यार्धरात्रौ गत्वा निजकौशल्येन तं हारं चोरयित्वा निर्गतस्तदुद्योतेन चौरो-

यमिति ज्ञात्वा गृहरक्षकैः कोट्टपालैश्च ध्रीयमाणः पलायितुमसमर्थो वारिषेणकुमारस्याग्रे तं हारं धृत्वाऽदृश्यो भूत्वा स्थितः। कोट्टपालभटैश्च तं तदालोक्य श्रेणिकाय कथितं देव वारिषेणश्चोर इति। तच्छ्रुत्वा तेनोक्तं मूर्खस्यास्य मस्तकं गृह्यतामिति। मातंगेन च योऽसिः शिरोग्रहणार्थं वाहितः। स कंठे तस्य पुष्पमाला बभूव। तमतिशयमाकर्ण्य श्रेणिकेन गत्वा वारिषेणः क्षमां कारितो लब्धाभयप्रदानेन विद्युच्चोरेण राज्ञो निजवृत्तांते कथिते वारिषेणं गृहं नेतुमारब्धम्। तेनोक्तं मया पाणिपात्रेण भोक्तव्यमिति। ततोसौ सुरदेवमुनिसमीपे पलाशकूटग्रामे चर्यायां प्रविष्टस्तत्र श्रेणिकस्य योऽग्निभूतस्तत्पुत्रेण पुष्पडालेन दृष्ट्वा स्थापितश्चर्यां कारयित्वा सोमिल्लां निजभार्यां दृष्ट्वा प्रभुपुत्रत्वाद्बालसखित्वाच्च स्तोकं मार्गानुव्रजनं कर्तुं वारिषेणेन सह निर्गतः आत्मनो व्याघुटनार्थं क्षीरवृक्षादिकं दर्शयन् मुहुर्मुहुर्वंदनां कुर्वन् हस्ते धृत्वा नीतो विशिष्टं धर्मश्रवणं कृत्वा तपो गृहीतोपि सोमिल्लां न विस्मरति। तौ द्वावपि द्वादशवर्षाणि तीर्थयात्रां कृत्वा वर्धमानस्वामिसमवसरणे गतौ वर्धमानस्वामिनः पृथिव्याश्च संबंधि गीतं देवैर्गीयमानं पुष्पडालेन श्रुतं। यथा मे इलकुचे णिडुंणिनाहें पवसियण्ण। कहजीवे सइधणिय धरडंजुंतिहियण्ण। एतदात्मनः सोमिल्लां च संयोज्य उक्तं। इतश्चलितः स वारिषेणेन ज्ञात्वा स्थिरीकरणार्थं निजनगरं नीतः चेलिन्या तौ दृष्ट्वा वारिषेणः किंचारित्राच्चलित आग-

च्छतीति संचिंत्य परीक्षार्थं सरागविरागे द्वे आसने दत्ते वीतरागासने वारिषेणेन भणितः इदं मदीयमंतःपुरं युवराजपदं च त्वं गृहाण । तच्छ्रुत्वा पुष्पडालोऽतीव लज्जितः परमवैराग्यं गतः परमार्थेन तपः कर्तुं लग्न इति । ततो वारिषेणो मुक्तिं गतः पुष्पडालश्च स्वर्गे देवो जातः ॥ ६ ॥

कथा ७.

वात्सल्ये विष्णुकुमारदृष्टांतोऽस्य कथा ।

अवंतिदेशे उज्जयिन्यां श्रीधर्मो राजा तस्य राज्ञी श्रीमती बलिर्बृहस्पतिः प्रल्हादो नमुचिश्चेति चत्वारो मंत्रिणः । तत्रैकदा समस्तश्रुताधारा दिव्यज्ञानिनः सप्तशतमुनिसमन्विता अकंपनाचार्या आगत्योद्यानवने स्थिताः । तैः समस्तसंघश्च वारितः राजन्यकेप्यायाते केनापि जल्पनं न कर्तव्यमन्यथा समस्तसंघस्य नाशो भविष्यतीति । राज्ञा च धवलगृहस्थितेन पूजाहस्तं नगरीजनं गच्छंतं दृष्ट्वा मंत्रिणः पृष्टाः क्वायं लोकोऽकालयात्रायां गच्छतीति तैरुक्तं क्षपणका बहवो बहिरुद्याने आयातास्तत्रायं जनो याति वयमपि तान् द्रष्टुं गच्छामः । इति भणित्वा राजापि तत्र मंत्रिसमन्वितो गतः । प्रत्येकं सर्वे वंदितवंतः । न केनाप्याशीर्वादो दत्तः । दिव्यानुष्ठानेनाऽतिनिस्पृहास्तिष्ठंतीति संचिंत्य व्याघुटिते राज्ञि मंत्रिभिर्दुष्टाभिप्रायैरुपहासः कृतः । बलीवर्दा एते किंचिदपि न जानंति । मूका इव मौनेन स्थिताः एवमुक्त्वा गच्छद्भिरग्रे चर्या

कृत्वा श्रुतसागरमुनिमागच्छंतमालोक्य उक्तमयं तरुणबली-वर्द्दः पूर्णकुक्षिरागच्छति एतदाकर्ण्य तेन ते राज्ञोग्रेऽनेकांत-वादेन जिताः। अकंपनाचार्यस्यागत्य वार्ता कथिता। तेन चोक्तं। सर्वसंघस्त्वया मारितो यदि वादस्थाने गत्वा रात्रौ त्वमेकाकी तिष्ठसि तदा संघस्य जीवितव्यं तव शुद्धिश्च भवतीति। ततोसौ तत्र गत्वा कायोत्सर्गेण स्थितः मंत्रि-भिश्चातिलज्जितैः क्रोधे रात्रौ संघं मारितुं गच्छद्भिस्तमेकमु-निमालोक्य येन परिभवः कृतः स एव हंतव्य इति पर्यालोच्य तद्वधार्थं युगपच्चतुर्भिः खड्गा उद्गूर्णाः। कंपितनगरदेवतया तथैव ते कीलिताः। प्रभाते तथैव सर्वलोकैर्दृष्टाः। रुष्टेन राज्ञा क्रमागता इति न मारिताः गर्दभारोहणादिकं कारयित्वा देशान्निर्धाटिताः। अथ कुरुजांगलदेशे हस्तिनापुरे राजा महापद्मो राज्ञी लक्ष्मीमती पुत्रौ पद्मो विष्णुश्च। एकदा पद्माय राज्यं दत्वा महापद्मो विष्णुना सह श्रुतसागरचंद्रा-चार्यपार्श्वे मुनिर्जातः। ते च बलिप्रभृतयः आगत्य पद्मरा-जस्य मंत्रिणो जाताः। कुंभपुरदुर्गे च सिंहबलो राजा दुर्ग-बलात्पद्ममंडलस्योपद्रवं करोति। एतद्ग्रहणचिंतया पद्मं दुर्बलमालोक्य बलिनोक्तं किं देवदौर्बल्यकारणमिति कथितं च राज्ञा तच्छ्रुत्वा आदेशं याचित्वा तत्र गत्वा बुद्धिमा-हात्म्येन दुर्गं भंक्त्वा सिंहबलं गृहीत्वा व्याघुट्यागतेन पद्मस्य समर्पितो साध्यः सिंहबल इति श्रुत्वा तेनोक्तं वांछितं वरं प्रार्थयेति। बलिनोक्तं यदा प्रार्थयिष्यामि तदा दीयतामिति।

अथ कतिपयदिनेषु विहरंतस्तेऽकंपनाचार्यादयः सप्तशतं यतयस्तत्रागताः। पुरक्षोभाद्बलिप्रभृतिभिस्तान्परिज्ञाय राजा एतद्भक्त इति पर्यालोच्य भयात्तन्मारणार्थं पद्मः पूर्ववरार्थं प्रार्थितः। सप्तदिनान्यस्माकं राज्यं देहीति। ततोसौ सप्त-दिनानि दत्त्वांतःपुरे प्रविश्य स्थितः। बलिना च आतपन-गिरौ कायोत्सर्गेण स्थितान्मुनीनावृत्त्यावेष्ट्या मंडपं कृत्वा यज्ञः कर्त्तुमारब्धः। उत्सृष्टशरावच्छागादिजीवकलेवरैर्धूमैश्च मुनीनां मारणार्थमुपसर्गः कृतः मुनयश्च द्विविधसंन्यासेन स्थिताः। अथ मिथिलानगर्यामर्धरात्रौ बहिर्विनिर्गति श्रुत-सागरचंद्राचार्येण आकाशे श्रवणनक्षत्रं कंपमानमालोक्याव-धिज्ञानेन ज्ञात्वा भणितं। महामुनीनां महोपसर्गो वर्त्तते। तच्छ्रुत्वा पुष्पदंतनाम्ना विद्याधरक्षुल्लकेन पृष्टं भगवन् क केषां मुनीनामिति। तेनोक्तम् हस्तिनागपुरे अकंपनादीनां उपसर्ग इति। कथं नश्यति। धरणीभूषणगिरौ विष्णुकुमा-रमुनिर्विक्रियाशुद्धिसंपन्नस्तिष्ठति स नाशयतीति। एतदाकर्ण्य तत्समीपे गत्वा क्षुल्लकेन विष्णुकुमारस्य सर्वस्मिन् वृत्तांते कथिते। मम विक्रियाशुद्धिरस्तीति संचिंत्य तत्परीक्षणार्थं हस्तः प्रसारितः स गिरिं भित्वा दूरे गतः। ततस्तां निर्णीय तत्र गत्वा पद्मराजो भणितः। किं त्वया मुनीनामुपसर्गः कारितो भवत्कुले केनापीदृशं न कृतं किं करोमि मया पूर्वमस्य वरो दत्त इति। विष्णुकुमारमुनिना वामनब्राह्मणरूपं धृत्वा दिव्यध्वनिना प्राऽध्ययनं कृतं बलिनोक्तं किं तुभ्यं

दीयते तेनोक्तं भूमेः पादत्रयं देहि । अहिलब्राह्मण बहुतर-मन्यत् प्रार्थयेति वारंवारं लोकैर्भण्यमानोपि तावदेव याचिते ततो हस्तोदकादिविधिना भूमिपादत्रये दत्ते । तेनैकपादो मेरौ दत्तो द्वितीयो मानुषोत्तरगिरौ तृतीयपादेन देवविमानादीनां क्षोभं कृत्वा बलिपृष्ठे तं पादं दत्वा बलिं भित्त्वा मुनीनामुपसर्गो निवारितः । ततस्ते चत्वारो मंत्रिणः पद्मश्च भयादागत्य विष्णुकुमारमुनेरकंपनाचार्यादीनां च पादयोर्लग्नास्ते मंत्रिणः श्रावकाश्च जाता इति । व्यंतरदेवैः सुघोषवीणात्रयं दत्तं विष्णुकुमारपादपूजार्थं ॥ ७ ॥

कथा ८.

प्रभावनायां वज्रकुमारदृष्टांतोऽस्य कथा ।

हस्तिनापुरे बलराजस्य पुरोहितो गरुडस्तत्पुत्रः सोमदत्तः सकलशास्त्राणि पठित्वाऽहिच्छत्रनगरे निजमामसुभूतिपार्श्वे गत्वा भणितं माम मां दुर्मुखराजस्य दर्शय तेन च गर्वितेन न दर्शितः । ततो अहिलो भूत्वा सभायां स्वयमेव तं दृष्ट्वाऽऽशीर्वादं दत्वा सर्वशास्त्रकुशलत्वं प्रकाश्य मंत्रिपदं लब्धवान् । तं तथाभूतमालोक्य सुभूतिमामो यज्ञदत्तां पुत्रीं परिणेतुं दत्तवान् । एकदा तस्या गर्भिण्या वर्षाकाल आम्रफलभक्षणे दोहलको जातस्ततः सोमदत्तेन तान्युद्यानवनेऽन्वेषयता यत्राम्रवृक्षे सुमित्राचार्यो योगं गृहीतवांस्तं नानाफलैः फलितं दृष्ट्वा तस्याम्रानादाय पुरुषहस्ते प्रेषितवान् । स्वयं

च धर्मं श्रुत्वा निर्विण्णस्तपो गृहीत्वाऽऽगममधीत्य परिणतः नाभिगिरावातपनेन स्थितो यज्ञदत्ता च पुत्रं प्रासूत । तं वृत्तांतं श्रुत्वा बंधुसमीपं गताऽस्य शुद्धिं ज्ञात्वा बंधुभिस्सह नाभिगिरिं गत्वा तमाऽतपनस्थितमालोक्यातिकोपात्तत्पादोपरि बालं धृत्वा दुर्वचनानि दत्त्वा गृहं गता । अत्र प्रस्तावे दिवाकरदेवनामविद्याधरोऽमरावतिपुर्याः पुरंधरनाम्ना लघुभ्रात्रा राज्यान्निर्घाटितः सकलत्रो मुनिं वंदितुमायातः । तं बालं गृहीत्वा निजभार्यायाः समर्प्य वज्रकुमार इति नाम कृत्वा गतः स च वज्रकुमारः कनकगिरौ विमलवाहननिजमैथुनिकसमीपे सर्वविद्यापारगो युवा च क्रमेण जातः । अथ गरुडवेगगंगावत्योः पुत्री पवनवेगा ऱ्हीमंतपर्वते प्रज्ञप्तिविद्यां श्रमेण साधयन्ती । पवनाकंपितबदरीवक्रकंटकेन लोचने विद्धातस्तत्पीडया चलचित्ता या विद्या न सिध्यति वज्रकुमरेण तां तथा दृष्ट्वा विज्ञानेन कंटक उधृतः ततःस्थिरचित्तायास्तस्या विद्या सिद्धा । उक्तं च तथा भवत्प्रसादेनैषा विद्या मे सिद्धा त्वमेव भर्त्तेत्युक्त्वा तया परिणीतः । वज्रकुमारेण च तद्विद्यां गृहीत्वामरावतीं गत्वा पितृव्यं संग्रामे जित्वा निर्घाट्य दिवाकरदेवो राज्ये धृतः । एकदा जयश्रीजनन्या निजपुत्रराज्यनिमित्तममर्षवहंत्यान्येन जातोऽन्यं संतापयतीत्युक्तं । तच्छ्रुत्वा वज्रकुमारेणोक्तं तात अहं कस्य पुत्र इति सत्यं कथय तस्मिन् कथिते मे भोजनादौ प्रवृत्तिरिति ततस्तेन पूर्ववृत्तांतः सर्वः सत्य एव कथितः । तमाकर्ण्य स निजगुरुं द्रष्टुं बंधुभिस्सह

मथुरायां क्षत्रियगुहायां गतः। तत्र च सोमदत्तगुरोर्दिवाकर-देवेन वंदनां कृत्वा वृत्तांतः कथितः। समस्तबंधून् महता कष्टेन विसृज्य वज्रकुमारो मुनिर्जातः। अत्रांतरे मथुरायामन्या कथा—

राजापूतिगंधो राज्ञी ऊर्व्यसौ च सम्यग्दृष्टिरतीव जिन-धर्मप्रभावनायां रता नंदीश्वराष्टदिनानि प्रतिवर्षं जिनेंद्ररथ-यात्रां त्रीन्वारान् कारयति। तत्रैव नगर्यां श्रेष्ठी सागरदत्तः श्रेष्ठिनी समुद्रदत्ता पुत्री दरिद्रा मृते सागरदत्ते दरिद्रैकदा परगृहे निक्षिप्तसिक्थानि भक्षयंती पुर्यां चर्याप्रविष्टेन मुनि-द्वयेन दृष्टा ततो लघुमुनिनोक्तं हा वराकी महता कष्टेन जीवतीति तदाकर्ण्य ज्येष्ठमुनिनोक्तं। अत्रैवास्य राज्ञः पट्टराज्ञी वल्लभा भविष्यतीति। भिक्षां भ्रमता धर्मश्रीवंदकेन तद्वचन-माकर्ण्य नान्यथा मुनिभाषणमिति संचिंत्य स्वविहारे नीत्वा मिष्टाहारैः पोषिता। एकदा यौवनभरे चैत्रमासे आंदोलयतीं तां राजा दृष्ट्वातीव विरहावस्थां गतः। ततो मंत्रिभिस्तां तदर्थं वंदको याचितस्तेन चोक्तं यदि मदीयं धर्मं राजा गृण्हाति तदा ददामीति तत्सर्वं कृत्वा परिणीता पट्टमहादेवी तस्यातीव-वल्लभा जाता। फाल्गुननंदीश्वरयात्रायामुर्विला रथयात्रा-महाटोपं दृष्ट्वा तया भणितं। देव मदीयो बुद्धरथोऽधुना पुर्यां प्रथमं भ्रमयितव्यः। राज्ञा चोक्तमेवमस्त्विति। तत्रो-र्विला वदति। मदीयो रथो यदि प्रथमं न भ्रमति तदा मरणे प्रवृत्तिरिति प्रतिज्ञां गृहीत्वा क्षत्रियगुहायां सोमदत्ताचा-

येपार्श्वे गता । तस्मिन् प्रस्तावे वज्रकुमारमुनेर्वंदनाभक्त्यर्थ-
मायाता दिवाकरदेवादयो विद्याधरास्तदीयवृत्तांतं च श्रुत्वा
वज्रकुमारमुनिना ते भणिताउर्विलायाः प्रतिज्ञारूढाय
रथयात्रा भवद्भिः कर्त्तव्येति ततस्तैर्बुद्धदासी रथभंगं कृत्वा
नानाविभूत्या उर्विलाया रथयात्रा कारिता । तमतिशयं दृष्ट्वा
प्रतिबुद्धा बुद्धदास्यन्ये च जना जिनधर्मरता जाता इति ॥

कथा ९.

**ननु सम्यग्दर्शनस्याष्टाभिरंगैः प्ररूपितैः किं प्रयो-
जनं तद्विकलस्याप्यस्य संसारो सामर्थ्यादीत्याशंक्याह-**

**हिंसाविरत्यणुव्रतात् मातंगेन चांडालेनोत्तमः पूजा-
तिशयः प्राप्तोऽस्य कथा ।**

सुरम्यदेशे पोदनपुरे राजा महाबलो नंदीश्वराष्टम्यां राज्ञा-
ष्ट दिनानि जीवामारणघोषणायां कृतायां बलकुमारेण चात्यं-
तमांसासक्तेन कंचिदपि पुरुषमपश्यता राजोद्याने राजकीयमें-
ढकः प्रच्छन्नेन मारयित्वा संस्कार्य भक्षितो राज्ञा च मेंढक-
मारणवार्तामाकर्ण्य रुष्टेन मेंढकमारको गवेषयितुं प्रारब्धः ।
तदुद्यानमालाकारेण च वृक्षोपरि चटितेन स तन्मारणं कुर्वाणो
दृष्टो रात्रौ च निजभार्यायाः कथितं । ततः प्रच्छन्नचरपु-
रुषेणाकर्ण्य राज्ञः कथितं । प्रभाते मालाकारोप्याकारितस्ते-
नैव पुनः कथितं मदीयामाज्ञां मम पुत्रः खंडयतीति । रुष्टेन

राज्ञा कोट्टपालो भणितो बलकुमारं नवखंडं कारयेति । ततस्तं कुमारं मारणस्थानं नीत्वा मातंगमानेतुं ये गताः पुरुषास्तान्विलोक्य मातंगेनोक्तं । प्रिये मातंगो ग्रामं गत इति कथय त्वमेतेषामित्युक्त्वा गृहकोणे प्रच्छन्नो भूत्वा स्थितः । तलारैश्चाकारिते मातंगे कथितं मातंग्या सोद्य ग्रामं गतः । भणितं च तलारैः स पापो पुण्यवानद्य ग्रामं गतः कुमारमारणात्तस्य बहुसुवर्णरत्नादिलाभो भवेत् । तेषां वचनमाकर्ण्य द्रव्यलुब्धतया हस्तसंज्ञया स दर्शितो ग्रामं गत इति पुनःपुनर्भणंत्या ततस्तैस्तं गृहान्निःसार्य तस्य मारणार्थं स कुमारः समर्पितस्तेन चोक्तं । नास्य चतुर्दशीदिने जीवघातं करोमि । ततस्तलारैः स नीत्वा राज्ञः कथितो देवायं राजकुमारं न मारयति । तेन च राज्ञः कथितं सर्पदष्टो मृतः श्मशाने निक्षिप्तः सर्वौषधिमुनिशरीरस्य वायुना पुनर्जीवितोहं तत्पार्श्वे चतुर्दशीदिवसे मया जीवाहिंसाव्रतं गृहीतमतोद्य न मारयामि। देवो यज्जानाति तत्करोतु। अहो अस्पृश्यचांडालस्य व्रतमिति संचित्य रुष्टेन राज्ञा द्वावपि गाढं बंधयित्वा शिंशुमारव्हदे निक्षेपितौ। तत्र मातंगस्य प्राणात्ययेप्यहिंसाव्रतमपरित्यजतो व्रतमाहात्म्याज्जलदेवतया जलमध्ये सन्मणिमंडपिकादुंदुभिसाधुकारादिप्रातिहार्यादिकं कृतं । महाबलराजेन चैतदाकर्ण्य भीतेन पूजयित्वा निजच्छत्रतले स्नापयित्वा स स्पृश्यो विशिष्टः कृत इति ।

कथा १०.

अनृतविरत्यणुव्रताद्धनदेवश्रेष्ठिना पूजातिशयः प्राप्तः। अस्य कथा।

जंबूद्वीपे पूर्वविदेहे पुष्कलावतीविषये पुंडरीकिन्यां पुर्यां वणिजौ जिनदेवधनदेवौ स्वल्पद्रव्यौ। तत्र धनदेवः सत्यवादी द्रव्यस्य लाभं द्वावप्यर्द्धमर्द्धं गृहीष्याव इति निःसाक्षिकां व्यवस्थां कृत्वा दूरदेशं गत्वा बहुद्रव्यमुपार्ज्य व्याघुट्य कुशलेन पुंडरीकिन्यामायातौ। तत्र जिनदेवो लाभार्धं धनदेवाय न ददाति। स्तोकद्रव्यमौचित्येन ददाति। ततो झकटके न्याये वसतिस जनमहाराजाग्रतो निःसाक्षिकव्यवहारबलात् जिनदेवो वदति न मयास्य लाभार्द्धं भणितमुचितमेव भणितं। धनदेवश्च सत्यमेव वदति * द्वयोरर्द्धमेव। ततो राजनियमात्तयोर्द्रव्यं दत्तं। धनदेवः शुद्धो नेतरस्ततः सर्वं द्रव्यं धनदेवस्य समर्पितं। तथा सर्वैः पूजितः साधुकीरितश्चेति। द्वितीयाणुव्रतस्याचौर्यविरत्यणुव्रताद्वारिषेणेन पूजातिशयः प्राप्तः। स्थितिकरणव्याख्यानप्रघट्टके कथितेह द्रष्टव्येति * तृतीयाणुव्रतस्य ॥ १० ॥

कथा ११.

ततः परं नीलिजयश्च ततस्तेभ्यस्त्रिभ्यः परं यथाभवत्येवं पूजातिशयं प्राप्तः। तत्राब्रह्मविरत्यणुव्रतान्नीलिका वणिक्पुत्री पूजातिशयं प्राप्ता। अस्याः कथा।

लाटदेशे भृगुकच्छपत्तने राजा वसुपालो वणिक् जिनदत्तो भार्या जिनदत्ता पुत्री नील्यतिशयेन रूपवती तत्रैवापरः श्रेष्ठी समुद्रदत्तो भार्या सागरदत्ता पुत्रो सागरदत्त एकदा महापूजायां सत्यां कायोत्सर्गस्थितां सर्वाभरणभूषितां नीलीमालोक्य सागरदत्तेनोक्तं किमेषा देवता काचिदेतदाकर्ण्य तन्मित्रेण प्रियदत्तेन भणितं। जिन-दत्तश्रेष्ठिन इयं पुत्री नीली। ततस्तद्रूपावलोकनादतीवासक्तो भूत्वा कथमियं प्राप्यत इति तत्परिणयनचिंतया दुर्बलो जातः। समुद्रदत्तेन चैतदाकर्ण्य भणितं हे पुत्र जैनं मुक्त्वा-न्यस्मै जिनदत्तो न ददातीति। पुत्रिकां परिणेतुमिति। तत-स्तौकपटेन श्रावकौ जातौ। परिणीता ततः पुनस्तौ बुद्धभ-क्तौ जातौ नील्याश्च पितृगृहे गमनमपि निषिद्धं। एवं जाते भणितं जिनदत्तेनेयं ममात्मजा कूपादौ वा पतिता यमेन वा नीता इति। नीली च श्वशुरगृहे भर्तुर्वल्लभा विभिन्नगृहे जिनधर्ममनुतिष्ठति। दर्शनसंसर्गात् वचनधर्मादेवाकर्णनाद्वा बुद्धभक्ता भविष्यतीति पर्यालोच्य समुद्रदत्तेन भणिता। नी-ली पुत्री वंदकानां ज्ञानिनामस्मदर्थं भोजनं देहि। ततस्तया वंदकानामेकस्यादरेण च तेषामेका प्राणहितातिमृष्टा संस्कार्य तेषामेव भोक्तुं दत्ता तैर्भोजनं भुक्त्वा गच्छद्भिः पृष्टं क्व प्रा-णहिता तयोक्तं भवंत एव जानंतु। यत्र तास्तिष्ठंति परि-ज्ञानादिपुनर्ज्ञानं नास्ति तदा वमनं कुर्वंतु भवतामुदरे प्राण-हितास्तिष्ठंतीति एवं वमने कृते दृष्टानि प्राणहिताखंडानि

ततो रुष्टश्च श्वशुरपक्षजनस्ततः सागरदत्तभगिन्यादिभिः कोपात्तस्या असत्यपरपुरुषदोषोद्भावना कृता तस्मिन् दोषे प्रसिद्धं गते सा नीली देवाग्रे संन्यसनं गृहीत्वा कायोत्सर्गेण स्थिता । दोषोत्तरे भोजनादौ प्रवृत्तिर्मम नान्यथेति । ततः क्षुभितनगरदेवतयागत्य रात्रौ सा भणिता । हे महामति मा प्राणत्यागमेवं कुरु । अहं राज्ञः प्रधानानां पुरजनस्य च स्वप्नं ददामि । लग्ना यथा नगरप्रतोल्यः कीलिता महासतीवाभरणेन स्पृष्टोद्धटिष्यतीति पादेन प्रतोलिस्पर्शं कुर्यास्त्वमिति भणित्वा राजादीनां स्वप्नं दर्शयित्वा प्रतोलीः कीलित्वा स्थिता सा नगरदेवता । प्रभाते कीलितां प्रतोलीं दृष्ट्वा राजादिभिस्तं स्वप्नं स्मृत्वा नगरसर्वस्त्रीचरणताडनं प्रतोलीनां कारितं न चैकापि प्रतोलिः कयाचिदप्युद्घाटिता सर्वासां पश्चान्नीली तत्रोत्क्षिप्यानीता तच्चरणस्पर्शात् सर्वा अप्युद्घाटिताः प्रतोल्यो निर्दोषा राजादिपूजिता च नीली जाता । चतुर्थाणुव्रतस्य ॥ ११ ॥

कथा १२.

परिग्रहविरत्यणुव्रताज्जयः पूजातिशयं प्राप्तोऽस्य कथा ।

कुरुजांगलदेशे हस्तिनागपुरे कुरुवंशे राजा सोमप्रभः पुत्रो जयः परिमितपरिगृहोऽस्य भार्या सुलोचना तस्यामेव प्रवृत्तिः । एकदा पूर्वविद्याधरभवकथनानंतरं समायातपूर्वज-

न्माद्यो हिरण्यवर्मप्रभावार्ती विद्याधररूपमादाय मेर्वादौ वंदनाभक्तिं कृत्वा कैलासगिरौ भरतप्रतिष्ठापितचतुर्विंशतिजिनालयान् वंदितुमायातौ सुलोचनाजयौ । तत्प्रस्तावे सौधर्मेण जयस्य स्वर्गे परिग्रहप्रमाणप्रशंसा कृता । तं परीक्षितुं रतिप्रभदेवः समायातः । ततः स्त्रीरूपमादाय चतसृभिर्विलासिनीभिस्सह जयसमीपं गत्वा भणितो जयः । सुलोचनास्वयंवरे येन त्वया महासंग्रामः कृतस्तस्य नमिविद्याधराधिपते राज्ञः सुरूपामभिनवयौवनां सर्वविद्याधारिणीं तद्विरक्तचित्तां मामिच्छ यदि तस्य राज्यमात्मजीवितं च वांछसीति । एतदाकर्ण्य जयेनोक्तं हे सुंदरि मैवं ब्रूहि परस्त्री मम जननीसमानेति ततस्तया जयस्योपसर्गे महति कृतेपि स न चलितः ततो मायामुपसंहृत्य पूर्ववृत्तांतं कथयित्वा प्रशस्य वस्त्रादिभिः पूजयित्वा स्वर्गं गत इति श्रीपंचाणुव्रतस्य ॥ १२ ॥

कथा १३.

एवं पंचानामहिंसादिव्रतानां प्रत्येकं गुणं प्रतिपाद्येदानीं तद्विपक्षभूतानां हिंसादिव्रतानां दोषं दर्शयितुमाह)तत्र धनश्रीर्हिंसातो बहुदुःखं प्राप्तेति । अस्याः कथा ।

लाटदेशे भृगुकच्छपत्तने राजा लोकपालो वणिक् धनपालो भार्या धनश्रीर्मनागपि न जीववधविरता । तत्पुत्री सुंदरी पुत्रो गुणपालः पुत्रकाले धनश्रिया यः पुत्रबुद्ध्या कुंडलनामा बालकः

पोषितः । धनपाले मृते तेन सह धनश्रीः कुकर्मरता संजाता। गुणपाले च गुणदोषपरिज्ञायके जाते धनश्रिया सक्ततया भणितः कुंडल प्रसरे गोधनं चारयितुमटव्यां गुणपालं प्रेषयामि त्वं तत्र तं मारय येनावयोर्निरंकुशमवस्थानं भवतीति ब्रुवाणां मातरमाकर्ण्य सुंदर्या गुणपालस्य कथितं । अद्य रात्रौ गोधनं गृहीत्वा प्रसरे त्वामटव्यां प्रेषयित्वा कुंडलहस्तेन माता मारयिष्यति । अतः सावधानो भवेस्त्वमिति । धनश्रिया च रात्रिपश्चिमप्रहरे गुणपालो भणितः । हे पुत्र कुंडलस्य शरीरं विरूपकं वर्ततेऽतः प्रसारणे गोधनं गृहीत्वाद्य व्रजेति । स गोधनमटव्यां नीत्वा काष्ठं वस्त्रेण पिधाय तिरोहितो भूत्वा स्थितः कुंडलेनागत्य गुणपालोयमिति मत्वा वस्त्राच्छादितकाष्ठे घातः कृतः गुणपालेन च खड्गेन हत्वा मारितो गृहमागतो गुणपालो धनश्रिया पृष्टः क रे कुंडलस्तेन चोक्तं । कुंडलवार्त्तामयं खड्गो जानाति ततो रक्तं खड्गमालोक्य स तेनैव खड्गेन मारितस्तं च मारयंतीं धनश्रियं दृष्ट्वा सुंदर्या मुसलेन सा हता कोलाहले जाते कोट्टपालैर्धनश्रीर्धृत्वा राज्ञोऽग्रे नीता राज्ञा च गर्दभारोहणं कर्णनासिकादिछेदनादिविकारे कारिते मृत्वा दुर्गतिं गतेति । प्रथमाव्रतस्य ॥ १३ ॥

कथा १४.

सत्यघोषोऽनृताद्बहुदुःखं प्राप्त इत्यस्य कथा।

जंबूद्वीपे भरते सिंहपुरे राजा सिंहसेनो राज्ञी रामदत्ता

पुरोहितः श्रीभूतिः स ब्रह्मसूत्रे कर्त्तिकां बध्वा भ्रमति वदति च । यदसत्यं ब्रवीमि तथाऽनया कर्त्तिकया निजजिह्वाच्छेदं करोमि । एवं कपटेन वर्तमानस्य तस्य सत्यघोष इति द्वितीयं नाम जातं लोकाश्च विश्वस्तास्तस्य पार्श्वे द्रव्यं धारयंति स च तत् द्रव्यं किंचित्तेषां समर्प्य स्वयं गृह्णाति फूत्कर्तुं बिभेति लोको न च फूत्कृतं राजा शृणोति । अथैकदा पद्मखंडपुरादागत्य भद्रमित्रसमुद्रदत्तो वणिक्पुत्रस्तत्र सत्यघोषसमीपेऽनर्घ्याणि पंचमाणिक्यानि धृत्वा परतीरे द्रव्यमुपार्जयितुं गतः । तत्र च तदुपार्ज्य व्याघुटितः स्फुटितप्रवहण एकफलकेनोत्तीर्य समुद्रं धृतमाणिक्यवांछया सिंहपुरे सत्यघोषसमीपमायातः । तं च रंकसमानमागच्छंतमालोक्य तन्माणिक्यहरणार्थिना सत्यघोषेण प्रत्ययपूरणार्थं समीपोपविष्टपुरुषाणां कथितं । अयं पुरुषः स्फुटितप्रवहणस्ततो ग्रहिलो जातोऽत्रागत्य माणिक्यानि याचिष्यतीति । तेनागत्य प्रणम्य चोक्तं भो सत्यघोष पुरोहित ममार्थोपार्जनार्थं गतस्योपार्जनार्थस्य महाननर्थो जात इति मत्वा यानि मया तव रत्नानि धर्तुं समर्पितानि तानीदानीं प्रसादं कृत्वा देहि । येनात्मानं स्फुटितप्रवहणात् गतद्रव्यं समुद्धरामि । तद्वचनमाकर्ण्य कपटेन सत्यघोषेण समीपोपविष्टा जना भणिता मया प्रथमं यद्भणितं तद्भवतां सत्यं जातं । तैरुक्तं भवंत एव जानंत्ययं ग्रहिलो स्यात् । स्थानान्निस्सार्यतामित्युक्त्वातो समुद्रदत्तो गृहान्निस्सारितो ग्रहिल इति भण्यमानः । पत्तने फूत्कारं कुर्वन्ममानर्घ्यपंच-

माणिक्यानि सत्यघोषेण गृहीतानि तथा राजगृहसमीपचिंचा-
वृक्षमारुह्य पश्चिमरात्रौ फूत्कृतिं कुर्वन् षण्मासान् स्थित-
स्तां फूत्कृतिमाकर्ण्य रामदत्तया भणितः सिंहसेनो देव नायं-
पुरुषो ग्रहिलो राज्ञापि भणितं किं सत्यघोषस्य चौर्यं संभाव्य
तेन पुनरुक्तं राज्ञा । देव संभाव्यते तस्य चौर्यं यतोयमेतादृ-
शमेव सर्वदा वचनं ब्रवीति । एतदाकर्ण्य भणितं राज्ञा यदि
सत्यघोषस्यैतत् संभाव्यते तदा परीक्षयेति लब्धादेशया
रामदत्तया सत्यघोषो राजसेवार्थमागच्छन् कार्यपृष्टः किं
बृहद्वेलायामागतोसि। तेनोक्तं । मम ब्राह्मणीभ्राताद्य प्राघू-
र्णकःसमायातस्तं भोजयतो बृहद्वेलाजातेति । पुनरप्युक्तं तया
क्षणमेकमत्रोपविश ममातिकौतुकं जातमक्षक्रीडां कुर्मो राजा
तत्रैवागतस्तेनाप्येवं कुर्वित्युक्तं । ततोऽक्षद्यूते क्रीडया संजा-
ते रामदत्तया निपुणमतिविलासिनीकर्णे लगित्वा भणिता ।
सत्यघोषपुरोहितो राज्ञीपार्श्वे तिष्ठति तेनाहं ग्रहिलमाणि-
क्यानि याचितुं प्रेषितेति तद्ब्राह्मण्यग्रे भणित्वा तानि याचि-
तानि गृहीत्वा च शीघ्रमागच्छेति । ततस्तया गत्वा तानि
याचितानि तानि तद्ब्राह्मण्या च पूर्वं सुतरां निषिद्धया न
दत्तानि तद्विलासिन्या चागत्य देवीकर्णे कथितं । सा न ददा-
तीति । ततो जितमुद्रिकां तस्य साभिज्ञानं दत्त्वा पुनः प्रेषि-
ता तथापि तया न दत्तानि ततस्तस्य कर्तिका यज्ञोपवीतं
जितं साभिज्ञानं दत्वा दर्शितं च तया तत् ब्राह्मण्या तद्दर्श-
नात् हृष्टया भीतया च समर्पितानि माणिक्यानि तद्विलासिन्या।

तया च रामदत्तायाः समर्पितानि। तया च राज्ञो दर्शितानि। तेन च बहुमाणिक्यमध्ये निक्षिप्याकार्य गृहीलो भणितः। रे निजमाणिक्यानि परिज्ञाय गृहाण तेन च तथैव गृहीतेपु तेपु राज्ञा रामदत्तया च पुत्रः प्रतिपन्नस्ततो राज्ञा सत्यघोषः पृष्ट इदं कर्म त्वया कृतं न वेति तेनोक्तं देव न करोमि किं ममेदृशं कर्तुं युज्यते ततोतिरुष्टेन राज्ञा तस्य दंडत्रयं कृतं गोमयभृतं भाजनत्रयं भक्षय मल्लमुष्टिघातत्रयं सहस्व द्रव्यं वा सर्वं देहि तेन पर्यालोच्य गोमयं खादितुमारब्धं तदशक्तेन मुष्टिघातं सहितुमारब्धं तदशक्तेन द्रव्यं दातुमारब्धं तदशक्तेन गोमयभक्षणं मुष्टिघात इत्येवं दंडत्रयमनुभूय मृत्वाऽतिलोभवशाद्राजकीयभांडागारेऽगंधसर्पो जातस्तत्रापि मृत्वा दीर्घसंसारी जात इति श्रीद्वितीयाव्रतस्य ॥ १४ ॥

कथा १५.

तापसश्चौर्यात् बहुदुःखं प्राप्त इत्यस्य कथा।

वत्सदेशे कौशांबीपुरे राजा सिंहरथो राज्ञी विजया। तत्रैकश्चोरः कौटिल्येन तापसो भूत्वा परं भूमिमस्पृशन् विलंब्यमानसिक्यस्थो दिवसे पंचाग्निसाधनं करोति रात्रौ कौशांबीं मुषित्वा तिष्ठति। एकदा राज्ञा महाजनान्नगरचौर्यमाकर्ण्य कोट्टपालो भणितः। रे सप्तरात्रिमध्ये चोरं निजशिरो वानय। ततश्चोरमलभमानश्चितापरोपराह्ले बुभुक्षि-

तत्राह्मणेन केनचिदागत्य भोजनाय प्रार्थितस्तेनोक्तं ब्राह्मण छंदसोसि। मम प्राणसंदेहो वर्तते त्वं च भोजनं प्रार्थयस एतद्वचनमाकर्ण्य पृष्टो ब्राह्मणेन कुतस्ते प्राणसंदेहः। कथितं च तेन। तदाकर्ण्य पुनः पृष्टं ब्राह्मणेनात्र किं कोप्यतिनिस्पृहवृत्तिः पुरुषोस्ति। उक्तं तलवरेणास्ति विशिष्टतपस्वी न च तस्यैतत् संभाव्यते भणितं ब्राह्मणेन स एव चोरो भविष्यतीति। निस्पृहत्वात्। श्रूयतां मदीयकथा। मम ब्राह्मणी महासती परपुरुषशरीरं न स्पृशतीति निजपुत्रस्याप्यतिकुत्कुटात्कर्पटेन सर्वशरीरं प्रच्छाद्य स्तनं ददाति। रात्रौ पिंडाकारेण सह कुकर्म करोति। तद्दर्शनात्संजातवैराग्योहं शांबलार्थसुवर्णशलाकां यष्टिमध्ये निक्षिप्य तीर्थयात्रायां निर्गतोग्रे गच्छतश्च ममैकबटुको मिलितो न च तस्य विश्वासं गच्छाम्यहं यष्टिरक्षां यत्नतः करोमि तेनाकलितां तां यष्टिं संगे बिभर्मि। एकदा रात्रौ कुंभकारगृहे निद्रां कृत्वा दूरं गत्वा तेन निजमस्तके लग्नं कुथितं तृणमालोक्यातिकुत्कुटेनोक्तं ममाग्रतो हाहा मया परतृणमदत्तं हिंसितं। इत्युक्त्वा व्याघुट्य तृणं तत्रैव कुंभकारगृहे निक्षिप्य दिवावसाने कृतभोजनस्य समागत्य मिलितः। भिक्षार्थं गच्छ तस्यातिशुचिरयमिति मत्वा विश्वसितेन मया सा यष्टिः कुक्कुरादिनिवारणार्थं समर्पिता। तां गृहीत्वा स गतः। ततो मया महाटव्यां गच्छतातिवृद्धपक्षिणोऽतिकुत्कुटं दृष्टं यथैकस्मिन्महति वृक्षे मिलिताः

---

१ गोपालेन.

पक्षिणो रात्रौ एकेनातिवृद्धपक्षिणा निजभाषया भणितः । रे रे पुत्रा अहमतीव गंतुं न शक्नोमि बुभुक्षितश्चलमनाः कदाचिद्भवत्पुत्राणां भक्षणं करोमि चित्तचांचल्यात् । अतो मम मुखं प्रभाते बध्वा सर्वेपि गच्छंतु तैरुक्तं हाहा तात पितामह त्वयि किं तत्संभाव्यते तेनोक्तं बुभुक्षितः किं न करोति पापम् । एवं प्रभाते पुनस्तस्य वचनात्तन्मुखं बध्वा गताः । स च वृद्धो गतेषु तेषु चरणाभ्यां मुखबंधनमुत्तार्य ततः पुत्रकान् भक्षयित्वा तेषामागमनसमये पुनश्चरणाभ्यां मुखे संयोज्यातिकुत्कुटेन क्षीणोदरो भूत्वा पतित्वा स्थितः । ततो नगरगतेन चतुर्थमतिकुत्कुटं दृष्टं यथा तत्र नगरे एकश्चोरस्तपस्वीरूपं धृत्वा बृहच्छिलां च मस्तकस्योपरि हस्ताभ्यामूर्ध्वं कृत्वा नगरमध्ये दिवा रात्रौ चातिकुत्कुटेनापसरजीवपदं ददाम्यपसरजीवपदं ददामीति भणन् भ्रमत्यपसर जीव इति चासावतिक्तः सर्वजनैर्भण्यते स च गर्तादिविजनस्थाने दिगवलोकनं कृत्वा सुवर्णभूपितमेकाकिनं प्रणमंतं तया शिलया मारयित्वा तद्द्रव्यं गृह्णाति । इत्येतिकुत्कुटचतुष्टयमालोक्य मया श्लोकोयं कृतः । बालमस्पर्शिका नारी ब्राह्मणो तृणहिंसकः । वने काष्ठमुखः पक्षी नगरे चापसरजीव इति ॥ १ ॥ इति कथयित्वा तलवरं धीरयित्वा संध्यायां स ब्राह्मणः सिक्यतपस्वीसमीपं गतः तपसि प्रतिचारकैर्निर्घाट्यमानो रात्र्यंधो भूत्वा तत्र पतित्वैकदेशे स्थितस्ते च प्रतिचारका अन्धपरीक्षणार्थं तृणक-

ठिकांगुल्यादिकं तस्याक्षिसमीपं नयंति स च पश्यन्नपि न पश्यति । बृहद्रात्रौ गुहायामंधकूपे च नगरद्रव्यं द्रीयमाणमालोक्य तेषां खानपानस्त्र्यादिकं चालोक्य प्रभाते राज्ञा मार्यमाणस्तलवरो रक्षितस्तेन रात्रिदृष्टिमावेद्य स सिक्यस्थे तपस्विचौरस्तेन तलवरेण बहुकदर्थनाभिकदर्थ्यमानो मृत्वा दुर्गतिं गतः। इति तृतीयात्रतस्य ॥

कथा १६.

अरक्षकैर्नात्रह्मनिवृत्त्याभावाद्दुःखं प्राप्तमस्य कथा ।

अहीरदेशे नासिक्यनगरे राजा कनकरथो राज्ञी कनकमाला । तलवरो यमदंडो माता तस्य वसुंधरी तरुणरंडा पुंश्चली । एकदा सा वध्वा धर्तुं समर्पिताभरणं गृहीत्वा रात्रौ संकेतितजारपार्श्वे गच्छंती यमदंडेन दृष्टा । सेविता चैकांते तदाभरणं चानीय तेन निजभार्याया दत्तं । तथा च दृष्ट्वा भणितं । मदीयमाभरणं मया श्वश्रूहस्ते धृतं । तद्वचनमाकर्ण्य तेन चिंतितं । या मया सेविता सा मम जननी भविष्यतीति । ततस्तस्या जारसंकेतगृहं गत्वा तां सेवित्वा तस्यां महासक्तो गूढवृत्त्या तया सह कुकर्मरतस्थितः। एकदा तद्भार्यया सहातिरुष्टया रजक्या कथितं मम भर्ता निजमात्रा सह तिष्ठति रजक्या च मालाकारिण्यै कथितमति विश्वासान्मालाकारिणी च कनकमालाराज्ञीनिमित्तं पुष्पाणि गृहीत्वा गता तया च पृष्टा सा कुतूहलेन जानासि छेका-

मप्यपूर्ववार्ता तया च तलवरद्विष्टया कथितं राज्या देवि यमदंडतलवरो निजजनन्या सह तिष्ठति कनकमालया राज्ञः कथितं राज्ञा च गुप्तपुरुषद्वारेण कुकर्म निश्चितं स तलवरो निगृहीतो दुर्गतिं गतः । इति चतुर्थव्रतस्य ॥

कथा १७.

परिग्रहनिवृत्त्यभावात् श्मश्रूनवनीतेन बहुतरं दुःखं प्राप्तमस्य कथा ।

अत्रायोध्यायां श्रेष्ठी भवदत्तो भार्या धनदत्ता पुत्रो लुब्धदत्तः स चैकदा वाणिज्येन दूरं गतः। तत्र समुपार्जितं द्रव्यं तत्तस्य चोरैर्नीतं ततो निर्धनेनैकेन मार्गे आगच्छता एकदा गोकुले तक्रपात्रं याचितं तस्मिन् पीते स्तोकं नवनीतं कूर्चे लग्नं आलोक्य गृहीत्वा चिंतितं तेन वाणिज्यं भविष्यत्यनेन एवं संचितयतस्तस्य श्मश्रूनवनीतमिति नाम जातं। एवमेकदा प्रस्थप्रमाणे घृते जाते तस्य घृतस्य भाजनं पादांते धृत्वा शीतकाले तृणं कृत्वा रात्रौ प्रस्तरे पतितः । संचिंतयत्यनेन घृतेन बहुतरमर्थमुपार्ज्य सार्थवाहो भूत्वा सामंतमहासामंतराज्यपदं प्राप्य क्रमेण सकलचक्रवर्ती भविष्यामि यदा तदा च मे सप्ततलप्रासादे शय्यागतस्य पादांते तदुपविष्टं स्त्रीरत्नं पादौ मुष्ट्या ग्रहिष्यति न जानासि पादमर्दनं कर्तुमिति स्नेहेन भणित्वा स्त्रीरत्नमेवं पादेन ताडयिष्याम्येवं चिंतयतानेन चक्रवर्त्तिरूपाविष्टेन पादेन हत्वा पतितं तद्धृतभाजनं तेन च घृतेन द्वारे संधुक्षितोग्निः सुतरां प्रज्वा-

लितः। ततो द्वारे प्रज्वलिते निःसर्त्तुमशक्तो दग्धो मृतो दुर्गतिं गत इच्छाप्रमाणरहितः पंचमाव्रतस्य ॥

कथा १८.

तत्राहारदाने श्रीषेणो दृष्टांतस्तस्य कथा ।

मलयदेशे रत्नसंचयपुरे राजा श्रीषेणो राज्ञी सिंहनंदिता। द्वितीयाऽनिंदिता च पुत्रौ क्रमेण तयोरिंद्रोपेंद्रौ तत्रैव ब्राह्मणः सत्यकी नाम ब्राह्मणी जंबू पुत्री सत्यभामा पाटलिपुत्रनगरे ब्राह्मणो शूद्रभट्टो बटुकान् वेदं पाठयति। तदीयचेटिकापुत्रश्च कपिलनामा तीक्ष्णमतित्वादाकर्णनज्ञत्या वेदं शृण्वानस्तत्पारगो जातो रुद्रभट्टेन कुपितेन पाटलिपुत्रो निर्धाटितः सोत्तरीययज्ञोपवीतं परिधाय ब्राह्मणो भूत्वा रत्नसंचयपुरे गतः सात्यकिना च तं वेदपारगं सुरूपं च दृष्ट्वा सत्यभामाया योग्योयमिति सा तस्मै दत्ता। सत्यभामा च रतिसमये विटचेष्टां तस्य दृष्ट्वा कुलजोयं न भविष्यतीति सा संप्रधार्य चित्ते विषादं वहंती तिष्ठति। एतस्मिन् प्रस्तावे रुद्रभट्टस्तीर्थयात्रां कुर्वाणो रत्नसंचयपुरे समायातः कपिलेन प्रणम्य निजधवलगृहे नीत्वा भोजनपरिधानादिकं कारयित्वा सत्यभामायाः सकललोकानां च मदीयोयं पितेति कथितं। सत्यभामया चैकदा रुद्रभट्टस्य विशिष्टभोजनं बहु सुवर्णं च दत्वा पादयोर्लगित्वा पृष्टं तात तव शीलस्य लेशोपि कपिले नास्ति ततः किमयं तव पुत्रो भवति न चेति सत्यमेव

कथय । ततस्तेन कथितं पुत्रि मदीयचेटिकापुत्र इति । एतदा-
कर्ण्य तदुपरि विरक्ता । सा हठादयं मामभिगमिष्यतीति
मत्वा सिंहनंदिताग्रमहादेव्याः शरणं प्रविष्टा तया च सा
पुत्रीति प्रतिज्ञातैव । एकदा श्रीषेणराजेन परमभक्त्या
विधिपूर्वकमर्ककीर्त्यो नितरां चारणमुनिभ्यां दानं दत्तं
तत्फलेन राज्ञा सह भोगभूमावुत्पन्ना तदनुमोदनासत्यभा-
मापि तत्रैवोत्पन्ना । स राजा श्रीषेणो दानप्रथमकारणा-
त्पारंपर्येण शांतिनाथतीर्थंकरो जातः ॥

कथा १९.

औषधदाने वृषभसेनादृष्टांतोऽस्याः कथा ।

जनपददेशे कावेरीपत्तने राजोग्रसेनः श्रेष्ठी धनपति-
र्भार्या धनश्री पुत्री वृषभसेना तस्या धात्री रूपवती नाम्न्ये-
कदा वृषभसेना स्नानजलगर्त्तायां रोगगृहीतं कुक्कुरं पति-
तलुठितोत्थितं रोगरहितमालोक्य चिंतितं धात्र्या पुत्री
स्नानजलमेवात्रारोग्यत्वे कारणं ततस्तया धात्र्या निजजनन्या
द्वादशवार्षिकाक्षिरोगगृहीताया रुधिते तया लोचने तेन
जलेन परीक्षणार्थमेकदिने धौते दृष्टी च शोभने जाते ततः
सर्वरोगापनयने सा धात्री प्रसिद्धा तत्र नगरे जाता । एक-
दोग्रसेनेन रणपिंगलमंत्री बहुसैन्योपेतो मेघपिंगलराजस्योपरि
प्रेषितः स च तं देशं प्रविष्टो विषस्यैकस्य सेवनात् ज्वरेण
गृहीतः स च व्याघुट्या गतः रूपवत्या च तेन जलेन

निरोगी कृतः। उग्रसेनोपि कोपात्तत्र गतस्तथा ज्वरितो व्याघुट्या गतो रणपिंगलाज्जलवृत्तांतमाकर्ण्य तज्जलं याचितवान् ततो मंत्र उक्तो धनश्रिया भो श्रेष्ठिन् कथं नरपतेः शिरसि पुत्री स्नानजलं क्षिप्यते । धनपतिनोक्तं । यदि पृच्छति राजा जलस्वभावं तदा सत्यं कथ्यते न दोषः। एवं भणिते रूपवत्या तेन जलेन निरोगीकृतः। उग्रसेन स्ततो निरोगेण राज्ञा पृष्टा रूपवती जलस्य माहात्म्यं । तया च सत्यमेव कथितं ततो राज्ञा व्याहूतः श्रेष्ठी स च भीतो राजसमीपमायातो राजा च गौरवं कृत्वा वृषभसेनां परिणेतुं स याचितस्ततः श्रेष्ठिना भणितं देव यद्याष्टाह्निकां पूजां। जिनप्रतिमानां करोषि तथा पंजरस्थान् पक्षिणश्चेन्मुंचसि। तथा गुप्तिषु सर्वमनुष्यांश्च मुंचसि तदा ददाम्युग्रसेनेन च तत्सर्वं कृत्वा परिणीता वृषभसेना पट्टराज्ञी च कृताऽतिवल्लभया तयैव च सह विमुक्तान्यकार्यक्रीडः एतस्मिन् प्रस्तावे यो वाराणस्यां पृथिवीचंद्रो नाम राजा धृत आस्ते । सोऽतिप्रचंडत्वात् तद्विवाहकालेपि न मुक्तः। ततस्तस्य राज्ञी नारायणदत्ता तया मंत्रिभिस्सह मंत्रयित्वा पृथिवीचंद्रमोचनार्थं वाराणस्यां सर्वत्रावारितसत्कारा वृषभसेना राज्ञी नाम्नी कारिता तेषु भोजनं कृत्वा कावेरीपत्तने गतास्तेन ब्राह्मणादिभ्यस्तद्वृत्तांतमाकर्ण्य रुष्टया रूपवत्या भणिता वृषभसेने त्वं मामपृच्छती वाराणस्यां कथं सत्कारान् कारयसि तया भणितं न च कारयाम्यहं किंतु मंत्रिणस्ते केनचित्कारणेन केनापि कारितास्तेषां शुद्धिं कुरु त्वमिति

चारपुरुषैः कृत्वा यथार्थं ज्ञातया वृषभसेनयाऽथ सर्वं कथितं तया च राजानं विज्ञाप्य मोचितः पृथिवीचंद्रस्तेन च चित्र-फलके वृषभसेनोग्रसेनयोरूपं कारितं तयोरधो निजरूपं सप्र-णामं कारितं सफलकस्तयोर्दर्शितो भणिता च वृषभसेना राज्ञी त्वं मम मातासि त्वत्प्रसादादिदं जन्म सफलं मे जातं ततः उग्रसेनः सन्मानं दत्वा भणितवान् त्वया मेघपिंगलस्योपरि गंतव्यमिति स च ताभ्यां वाराणसीं प्रेषितः मेघपिंगलोप्ये-तदाकर्ण्य ममायं पृथिवीचंद्रो मर्मभेदीति पर्यालोच्यागत्य चोग्रसेनस्यातिप्रसादितसामंतो जातः उग्रसेनेन चास्थान-स्थितस्य यन्मे प्राभृतमागमिष्यति तस्यार्धं मेघपिंगलस्य दास्याम्यर्धं च वृषभसेनाया इति व्यवस्था कृता । एवमे-कदा रत्नकंबलद्वयमागतमेकैकं सनामांकं कृत्वा तयोर्दत्तं । एकदा मेघपिंगलस्य राज्ञी तं कंबलं प्रावृत्य प्रयोजनेन रूपवतीपार्श्वे गत्वा तत्र कंबलपरिवर्त्तो जातः । एकदा वृष-भसेनाकंबलं प्रावृत्य मेघपिंगलः सेवायामुग्रसेनसभायां गतः । राजा च तमालोक्यातिकोपाद्रक्ताक्षो बभूव मेघपिंग-लश्च तं तथाभूतमालोक्य ममोपरि कुपितोयं राजेति ज्ञात्वा दूरे नष्टः । वृषभसेना रुष्टेनोग्रसेनेन मारणार्थं समुद्रजले निक्षिप्ता तया च प्रतिज्ञा गृहीता यद्येतस्योपसर्गस्योद्ध-रामि तदा तपः करिष्यामीति । ततो व्रतमाहात्म्याज्जलदेवतया तस्याः सिंहासनादिप्रातिहार्यं कृतं । तच्छ्रुत्वा पश्चात्तापं कृत्वा राजा तामानेतुं गतः । आगच्छता च वनमध्ये गुणधरनामा

ऽवधिज्ञानी मुनिः पृष्टः । स च वृषभसेनया प्रणम्य निज-पूर्वभवचेष्टितं पृष्टः कथितं च भगवता यथापूर्वभवे त्वमत्रैव ब्राह्मणपुत्री नागश्रीनाम जातासि राजकीयदेवकुले सन्मार्जनं करोषि । तत्र चैकदाऽपराह्णे प्राकाराभ्यंतरे निर्वातग-र्त्तायां मुनिदत्तनामा मुनिः पर्यंककायोत्सर्गेण स्थितः । त्वया च रुष्टया स भणितः कटकाद्राजा समायातोऽत्रागमिष्यत्यु-त्तिष्ठोत्तिष्ठ सन्मार्जनं करोमि । लग्नेति । तत्र मुनिकायो-त्सर्गं विधाय मौनेन स्थितः ततस्त्वया कच्चरेण पूरयि-त्वोपरि मार्जनं कृतं प्रभाते तत्रागतेन च राज्ञा तत्र देश क्रीडतोच्छ्वसितनिःश्वसितप्रदेशं दृष्ट्वोत्खातो निस्सारितश्च स मुनिः ततस्त्वयात्मनिंदां कृत्वा धर्मं कृत्वा परमादरेण च तस्य मुनिमहत्पीडोपशमनार्थं विशिष्टमौषधदानं वैय्या-वृत्यं च कृतं ततो दानेन मृत्वेहधनपतिधनश्रियोः पुत्री वृषभसेना नाम्नी जातासि औषधदानफलात्सर्वौषधिफलं जातं । कचारपूरणात्कलंकता च । इति श्रुत्वात्मानं मोचयित्वा वृपभसेना तत्समीप आर्यिका जाता ॥ इति औषधदानफलं ॥

कथा २०.

श्रुतदाने कौंडेशो दृष्टांतोऽस्य कथा—

कुरुमरिग्रामे गोपालो गोविंदनामा तेन च कोटरादुधृत्य चिरंतनपुस्तकं प्रपूज्य भक्तया पद्मनन्दिमुनये दत्तं । तेन पुस्तकेन तत्राटव्यां पूर्वभट्टारकाः केचित्किल पूजां कारयित्वा च

व्याख्यानं कृतवंतः कोटराद्धृत्वा गतवंतश्च गोविंदेन च बाल्यात्प्रभृति तद्दृष्ट्वा नित्यमेव पूजा कृता वृक्षस्यापि । एष स गोविंदो निदानेन मृत्वा तत्रैव ग्रामकूटस्य पुत्रोऽभूत् तमेव पद्मनंदिमुनिमालोक्य जातिस्मरो जातस्तपो गृहीत्वा कौंडेशनामा महामुनिः श्रुतधरोऽभूत् इति ॥ श्रुतदानस्य फलं ।

कथा २१.

वसतिकादाने सूकरो दृष्टांतोऽस्य कथा—

मालवदेशे घटग्रामे कुंभकारो देविलनामा नापितश्च धम्मिल्लनामा ताभ्यां पथिकजनानां वसतिकानिमित्तं देवकुलं कारितं। एकदा देविलेन मुनये तत्र प्रथमं वसतिर्दत्ता धम्मिल्लेन च पश्चात्परिव्राजकस्तत्रानीय धृतस्ताभ्यां मुनिस्ततो निस्सारितः स वृक्षमूले रात्रौ दंशमशकशीतादिकं सहमानः स्थितः प्रभाते देविलधम्मिलौ तत्कारणेन परस्परं युद्धं कृत्वा मृत्वा विंध्ये क्रमेण सूकरव्याघ्रौ प्रौढौ जातौ यत्र च गुहायां स सूकरस्तिष्ठति तत्रैव गुहायामेकदा समाधिगुप्तित्रिगुप्तिमुनी आगत्य स्थितौ । तौ च दृष्ट्वा जातिस्मरो भूत्वा देविलवरसूकरो धर्ममाकर्ण्य व्रतं गृहीतवान् । तत्प्रस्तावे मनुष्यगंधमाघ्राय मुनिभक्षणार्थी स व्याघ्रोऽपि तत्रायातः सूकरश्च तयो रक्षानिमित्तं गुहाद्वारे स्थितः। तत्रापि तौ परस्परं युध्वा मृतौ । सूकरो मुनिरक्षणाभिप्रायेण शुभाभिसंधिर्मृत्वा सौधर्मे

महर्धिको देवो जातः। व्याघ्रस्तु मुनिभक्षणाभिप्रायेण रौद्र ध्यानेन मृत्वा नरकं गतः॥ इति वसतिदानस्य फलं ॥

कथा २२.

मगधदेशे राजगृहनगरे राजा श्रेणिकः श्रेष्ठी नागदत्त श्रेष्ठिनी भवदत्ता। स नागदत्तश्रेष्ठी सर्वदा मायायुक्तत्वा मृत्वा निजप्रांगणवाप्यंभसि भेको जातः। तत्र चागतामेकदा भवदत्तां भेकेनालोक्य जातिस्मरो भूत्वा तस्याः समीप आगत पर्य्युत्प्लुत्य चटितः। तया च पुनः पुनर्निर्धाटितो रटति पुन रागत्य चटति ततस्तया कोप्ययं मदीय इष्टो भविष्यतीति संप्रधार्यावधिज्ञानी सुव्रतमुनिः पृष्टस्तेन च तद्वृत्तांते कथिते स गृहे नीत्वा परमगौरवेणासौ धृतः श्रेणिकमहाराजश्चैकदा वर्धमानस्वामिनं वैभारपर्वते समागतमाकर्ण्यानंदभेरीं दापयित्वा महता विभवेन च वंदितः श्रेष्ठिन्यादौ च गृहजना वंदनाभक्त्यर्थं गते स भेकः प्रांगणवापीकमलं पूजानिमित्तं गृहीत्वा गच्छन् हस्तिना पादेन चूर्णयित्वा मृतः। पूजानुरागवशेनोपार्जितपुण्यप्रभावात्सौधर्मे महर्धिकदेवो जातोऽवधिज्ञानेन पूर्वभववृत्तांतं ज्ञात्वा निजमुकुटाग्रे भेकचिह्नं कृत्वा समधिगत्य वर्धमानस्वामिनं वंदमानः श्रेणिकेन दृष्टः। ततस्तेन गौतमस्वामी भेकचिह्नोऽस्य किं कारणमितिपृष्टस्तेन च पूर्ववृत्तांतः कथितस्तच्छ्रुत्वा सर्वे भव्यजनाः पूजातिशयविधान उद्यताः संजाता इति ।*

। श्रीः ॥

श्रीमन्महाकविकालिदासप्रणीतः

श्रुतबोधः

श्रीयुत नारायणपण्डितेन प्रणीतया संस्कृत-
टीकया सन्दर्भितः

मुरादाबादनिवासिना

व्रजरत्नभट्टाचार्य्येण

प्रणीतया रत्नप्रभाख्यया हिन्दीव्याख्यया
समलङ्कृतः

सोऽयम्

मुम्बय्याम्

जावजी दादाजी इत्येतेषां

"निर्णयसागर" मुद्रणालयाधिपतिना तुकाराम
जावजी इत्यनेन मुद्रयित्वा प्रकाशितः ।

शके १८२८ सन १९०६.

मूल्यं ०=॥ आणकाः.

॥ श्रीः ॥

श्रीमन्महाकविकालिदासप्रणीतः

श्रुतबोधः

श्रीयुत नारायणपण्डितेन प्रणीतया संस्कृत-
टीकया सन्दर्भितः

मुरादाबादनिवासिना

व्रजरत्नभट्टाचार्य्येण

प्रणीतया रत्नप्रभाख्यया हिन्दीव्याख्यया
समलङ्कृतः

सोऽयम्

मुम्बय्याम्

जावजी दादाजी इत्येतेषां

"निर्णयसागर" मुद्रणालयाधिपतिना तुकाराम जावजी

इत्यनेन मुद्रयित्वा प्रकाशितः ।

शाके: १८२८ सन १९०६.

मूल्य ०=॥ आना.

श्री

भूमिका

"नागर नन्दकिशोर, मुरलीअधरन मधुरछवि ।
चाहृतचित्तचकोर, कृष्णचन्द्रमुखचंद्रको ॥ १ ॥

प्रियवाचकवर्ग !

यह छन्दशास्त्रभी वेदका एक अङ्ग[1] है, परन्तु छन्द दो प्रकारके होते हैं एक वैदिक, दूसरे लौकिक, वैदिक छन्दोंका ग्रन्थ शेषकृत पिङ्गल इस समय दुष्प्राप्यहै. और लौकिक छन्दोंके दो ग्रन्थ इस समय प्रसिद्ध हैं, एक तौ श्रीकालिदासकृत 'श्रुतबोध' दूसरा श्रीकेदारभट्टप्रणीत 'वृत्तरत्नाकर' इनमेंभी 'वृत्तरत्नाकर' 'श्रुतबोध' की अपेक्षा कठिण और न्यून प्रचार है. यह 'श्रुतबोध' बनारस कालिजकी प्रथमा परीक्षा आदि औरभी परीक्षाओंमें नियत है, प्रियवर ? लीजिये आज उस (श्रुतबोध)-की भी भाषाटीका आपकी भेंट हैं, ग्रन्थकारने इसमें प्रसिद्ध २ चालीस छन्दोंके लक्षण लिखे हैं, विशेष चातुर्य्य इसमें यह है कि-जिस छन्दका लक्षण लिखा हैं वोह लक्षण उसी छन्दोबद्ध श्लोकमें लिखा है ।

यद्यपि 'कालिदास' नामके अनेक कवीवर हुए हैं तथापि उनमेंसे यह परिचय देकर इस लघु ग्रन्थको गौरव नही देना है कि कौनसे कालिदासका[2] निर्मित यह अनुपम ग्रन्थ हैं ।

---

१ शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः । ज्यौतिपामयनं चैव वेदाङ्गानि षडेव तु ॥ १ ॥

२ बहुत सुप्रसिद्ध महापण्डित महाशयोंका यह कथन हैं कि-रघुवंशके कर्त्ता कालिदासका यह ग्रन्थ नहीं है, उनके 'रघुवंश—शाकुन्तल–विक्रमोर्वशी' निर्मित यह तीनही ग्रन्थ विदित होते हैं कारणकी

परीक्ष्य विद्यार्थियोंको इस ग्रन्थसे बहुत कार्य पडता है, अतएव उनके उपकारार्थ मैनें इसके उपर 'रत्नप्रभा' नामक भाषाटीका बनायी है यदि इसके पढनेसे छात्रवर्गको कुछभी लाभ पहुंचेगा तौ परिश्रम सफल माना जायगा ।

२ वैशाख कृष्ण १९५२, गुरुवार. | ब्रजरत्नभट्टाचार्य्यः मोहल्ला-पट्टुवर गंज मुरादावाद.

औरोंकी रचना भिन्न २ ज्ञात होती है यदि येही कथन प्रमाण माना जाय तब तौ 'विक्रमोर्वशीय' भी उक्त कालिदासका निर्मित नही जाना जाता, क्योंकि उसमें दो-तीन स्थानोंमें स्वयं कालिदासनें नाम लिखा है. 'शकुन्तला' के निर्माता कालीदासकी यह प्रणाली नहीं कि-वोह स्वयं नाम लिखें, जो हो सो हो इस विवादसे यहां कोयी लाभ नहीं ॥

श्रीः

समर्पणम्

स्वर्गसुखप्राप्तेभ्यो मृत्योः प्रागसामान्यपाण्डित्याभिमानिभ्यः श्रीमज्ज्यौतिर्विद् ज्वालानाथपण्डितेभ्य इयं रत्नप्रभारूपकुसुमाञ्जलिः सबहुमानपुरःसरं समर्पितमस्ति—

तेषामौरसपुत्रेण-
व्रजरत्नभट्टाचार्य्येण
[टीकाकारेण]

श्रीः

श्रुतबोधे प्रश्नाः.

A. मणिबन्धस्यान्ते एकगुरुयोजने किं छन्दो भवति ।

B. आद्यास्त्रयः अष्टमः दशमः द्वादशत्रयोदशौ च यस्मिन् वृत्ते गुरवः तस्य किं नाम ।

C. श्रुतबोध इति नामान्वर्थं अनन्वर्थं वा । अन्वर्थं चेत् कथम् "पादान्तस्थं विकल्पेन" साध्याहारं व्याख्यायतामुदाह्रियतां च ।

D. लक्ष्यन्तांमुदाह्रियतां चाधोविन्यस्तछन्दांसि, शालिनी-मन्दाक्रान्ता-शिखरिणी-स्रग्धरा-उपेन्द्रवज्रा चेति ।

E. पृथ्वीहरिण्योः कस्मिन् विषये भेदः कस्मिँश्चाभेदः सलक्षण-मुत्तरणीयम् ।

F. "संस्तादम्बुमदम्बुदालिगलरुग्देवो मुदे वो मृडः"

"कनककुण्डलमण्डितगण्डया
जघनदेशनिवेशितवीणया ।
अमरराजपुरे सुरकन्यया
तव यशोविमलं परिगीयते ॥ १ ॥"

"द्वन्द्वोऽपि द्विगुरपि चाहम्मद्गेहे नित्यमव्ययीभावः । तत्पुरुष कर्म धारय येनाहं स्यां बहुव्रीहिः ॥"

"कथमयमपि कालश्चारुचन्द्रावतंसः" एषु कानि छन्दांसि ।

व्रजरत्नभट्टाचार्यः
पट्टवरगंज.
मुरादाबाद.

श्रीः ।

श्रुतबोधः सटीकः ।

रत्नप्रभाख्यभाषाटीकासंवलितः ।

ग्रन्थप्रतिज्ञा ।

छन्दसां लक्षणं येन श्रुतमात्रेण बुध्यते ॥
तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

श्रीमत्सारस्वतं धाम नत्वा स्तुत्वा च सद्गुरुम् ॥
टीका श्रीश्रुतबोधस्य छन्दसः क्रियते मया ॥

छन्दसामिति ॥ अहं तं श्रुतबोधं नाम छन्दःशास्त्रं संप्रवक्ष्यामि । कीदृशं तम् । अविस्तरं न विद्यते विस्तरो यस्मिन् सोऽविस्तरस्तमविस्तरम् । येन श्रुतमात्रेण प्रस्तारादिविनैव छन्दसामार्यानुष्टुबादीनां लक्षणं गुरुलघुवर्णमात्रागणादिस्वरूपं बुध्यते ज्ञायत इत्यन्वयः ॥ १ ॥

" करहु कृपाकी कोर, कालीमर्दन नन्दसुत ॥
चित बहु हमरीओर, कंसनिकन्दन व्रजरतन ॥ १ ॥"

जिसके श्रवणमात्रहीसे कतिपय छन्दोंके लक्षण विदित हो जाते हैं, तिस स्वल्पविस्तारवाले श्रुतबोधनामक ग्रन्थकूं मैं वर्णन करूंगा ॥ १ ॥

परिभाषा ।

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ॥
विज्ञेयमक्षरं गुरु पादान्तस्थं विकल्पेन ॥ २ ॥

अथ छन्दोलक्षणस्य लघुगुरुज्ञानमन्तरेण दुर्विज्ञेयत्वाल्ल-

घुगुरुलक्षणमाह । संयुक्ताद्यमिति ॥ एतादृशमक्षरं गुरु ज्ञेयम् । कीदृशमक्षरम् । संयुक्ताद्यं संयुक्तस्य संयोगीभूतस्याद्यमादिभवम् । पुनः कीदृशम् । दीर्घं द्विमात्रकम् । सानुस्वारमनुस्वारेण सह वर्तमानम् । पुनः विसर्गसंमिश्रं विसर्गेण संमिश्रं विसर्गसहितम् । पादान्तस्थमक्षरं विकल्पेन गुरु लघु विज्ञेयम् । पादान्ते गुरुरपि लघुः स्यात्कुत्रचिल्लघुरपि गुरुः स्यात् । तथा चोक्तं ग्रन्थान्तरे । वा पादान्ते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रको लघुः ॥ २ ॥

संयोगी वर्णसे प्रथम रहनेवाला अक्षर, और दीर्घ (द्विमात्रिक) तथा अनुस्वारसहित और विसर्गसमन्वित अक्षर दीर्घ होता है, और श्लोकके चरणान्तके अक्षरको विकल्पसे दीर्घ[1] जानना चाहिये ॥ २ ॥

गणलक्षणम् ।

आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ॥ ३ ॥

श्लोकादौ कस्मिंश्चिद्गणे पतिते शुभं कस्मिंश्चिद्गणे पतिते चाशुभं भवतीत्यष्टगणानां लक्षणमाह । आदिमध्यावसानेष्विति ॥ भजसाः भगणजगणसगणाः आदिमध्यावसानेषु गौरवं गुरुतां यान्ति । आदिश्च मध्यं च अवसानं च तानि तेषु । तथाहि । आदिगुरुर्भगणः । मध्यगुरुर्जगणः । अन्त्यगुरुः सगणः । यरताः यगणरगणतगणाः आदिमध्यावसानेषु लाघवं लघुतां यान्ति तथापि । आदिलघुर्यगणः । मध्यलघू रगणः । अन्त्यलघुस्तगणः । तु पुनः मनौ मगणन-

---

१ पादके अन्तका अक्षर दीर्घ हो वा ह्रस्व हो परन्तु—वोह विकल्पसे दीर्घ माना जाताहै । यह क्रम द्वितीय और चतुर्थ पादमें होता है, और प्रथम तथा तृतीय पादमें तौ 'वसन्ततिलका' आदिहीमें होता है ॥

गणौ आदिमध्यावसानेषु गुरुलाघवं गुरुतां लघुतां च यातः। तथा च । सर्वगुरुर्मगणः सर्वलघुर्नगणः भवतीति । एतेषां देवताः फलानि च ग्रन्थान्तरे । 'मो भूमिः श्रियमातनोति य जलं वृद्धिं र वह्निर्मृतिं सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम् ॥ जः सूर्यो भयमाददाति विपुलं भेन्दुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः'॥३॥

भगण जगण और सगण क्रमसे आदि मध्य और अन्तमें गुरु [दीर्घ] होते हैं, और यगण रगण और तगण क्रमसे आदि मध्य और अन्तमें लघु [ह्रस्व] होते हैं, तथा मगण और नगण यथाक्रमसे गुरु और लघु होते हैं; अर्थात्—जिसके आदिमें गुरुवर्ण हो सो भगण, जिसके मध्यमें गुरुवर्ण हो सो जगण, और जिसके अन्तमें गुरुवर्ण हो सो सगण कहाता है । और जिसके आदिमें लघुवर्ण हो सो यगण, जिसके मध्यमें लघु हो सो रगण, और जिसके अन्तमें लघु हो सो तगण कहाताहै; और मगणमें तीनो (आदि-मध्य-अन्त्य) वर्ण गुरु होतेहैं, तथा नगणमें तीनों वर्ण लघु होते हैं ॥ ३ ॥

आर्याछन्दः ।

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ॥
अष्टादश द्वितीये चतुर्थके पञ्चदश सार्या ॥ ४ ॥

यस्याः पाद इति ॥ सा आर्या भवति । सा का । यस्याः प्रथमे पादे द्वादश मात्राः स्युः । तृतीये तथा द्वादश मात्रा भवन्ति । द्वितीयेऽष्टादश मात्रा भवन्ति । चतुर्थके पञ्चदश मात्रा भवन्ति । सा आर्या ॥ ४ ॥ आर्या चरणेषु क्रमान्मात्राः—१२, १८, १२, १५ ॥

जिसके प्रथम और तृतीय चरणमें बारह २ तथा द्वितीय

चरणमें अठार और चतुर्थ चरणमें पन्दरह मात्रा हों वोह आर्या छन्द कहाता है ॥ ४ ॥

गीतिः (आर्या) ।

आर्यापूर्वार्धसमं द्वितीयमपि यत्र भवति हंसगते ॥
छन्दोविदस्तदानीं गीतिंताममृतवाणि भाषन्ते ५

आर्यापूर्वार्धसममिति ॥ हे अमृतवाणि छन्दोविदस्तदानीं तां गीतिं भाषन्ते ब्रुवते । हे हंसगते यत्रार्यापूर्वार्धसमं द्वितीयमपि उत्तरार्धमपि भवति । पूर्वार्धस्य प्रथमे द्वादश मात्रा द्वितीयेऽष्टादश तृतीये द्वादश चतुर्थकेऽष्टादश संकलनया षष्टिमात्रेत्यर्थः । अमृतमिव वाणी वाक् यस्याः साम्रृतवाणी तस्याः संबुद्धौ । छन्दांसि विदन्ति जानन्तीति छन्दोविदः शास्त्रज्ञा इत्यर्थः । हंसस्य गतिर्गमनमिव गमनं यस्याः सा हंसगता तस्याः संबुद्धौ हंसगते इत्यर्थः ॥ ५ ॥ गीतिः चरणेषु क्रमान्मात्राः—१२, १८, १२, १८

हे हंसकी सदृश गतिवाली प्रिये ! जिसका पूर्वार्ध और उत्तरार्ध आर्या छन्दके पूर्वार्धकी समान हो, हे मधुरभाषिणि ! तिसको छन्दशास्त्रज्ञ पण्डित गीति छन्द कहते हैं, अर्थात्–जिसके प्रथम चरणमें बारह और द्वितीयमें अठारह तथा तृतीयमें बारह और चतुर्थमें अठारह मात्रा हों सो गीति छन्द कहाताहै ॥ ५ ॥

उपगीतिः (आर्या) ।

आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ॥
कामिनि तामुपगीतिं प्रकाशयन्ते महाकवयः ॥६॥

आर्योत्तरार्धतुल्यमिति ॥ हे कामिनि महाकवयस्तामुपगीतिं प्रकाशयन्ते । उपगीतिसंज्ञकां प्रकटीकुर्वते इत्यर्थः । यदि आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत्प्रयोगीकृतं

---

१ एक ह्रस्व अक्षरकी एकही मात्रा होती है ॥

भवति। उत्तरार्धेन द्वादशमात्रिकेण तुल्यं समानं भवति। प्रथमे द्वादश मात्रा, द्वितीये पञ्चदश, तृतीये द्वादश, चतुर्थे पञ्चदश, संकलनया ५४ चतुष्पंचाशन्मात्रेत्यर्थः। कामो विद्यते यस्याः सा कामिनी तस्याः संबुद्धौ। महान्तश्च ते कवयश्चेति कर्मधारयः। तथा चोक्तं ग्रन्थान्तरे। आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात्॥ यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते॥ ६॥ उपगीतिः चरणेषु क्रमान्मात्राः—१२, १५, ११, १५॥

हे कामिनि! जिसका प्रथमार्धभी आर्या छन्दके उत्तरार्धकी तुल्य प्रयोग किया जाय उस छन्दको बडे बडे कवीश्वर उपगीति छन्द कहते हैं, अर्थात्–जिसके प्रथम चरणमें बारह और द्वितीयमें पन्दरह तथा तृतीयमें बारह और चतुर्थमें पन्दरह मात्रा हों वोह उपगीति छन्द कहाता है॥ ६॥

अक्षरपङ्क्तिछन्दः।

आद्यचतुर्थं पञ्चमकं चेत्॥
यत्र गुरु स्यात्साक्षरपंक्तिः॥ ७॥

आद्यचतुर्थमिति॥ यत्र यस्यां वृत्तौ आद्यं प्रथमं चतुर्थं पञ्चमकं गुरु स्यात्साक्षरपङ्क्तिः ज्ञेया। अक्षरशब्दः पादपूरणार्थः छन्दस्तु पङ्क्तिः 'प्रतिचरणे इदं लक्षणम्'। तथा चोक्तं रत्नाकरे। भोगाविति पङ्क्तिः॥ ७॥ अक्षरपङ्क्तिः। चरणाक्षराणि ५ ग० भ, गु, गु॥

जिस छन्दमें प्रथम चतुर्थ और पंचम वर्ण गुरु [दीर्घ] हो उसे अक्षरपङ्क्ति (पङ्क्ति) छन्द कहते हैं॥ ७॥

शशिवदनाछन्दः।

अगुरुचतुष्कं भवति गुरू द्वौ॥
घनकुचयुग्मे शशिवदनासौ॥ ८॥

अगुर्विति ॥ हे घनकुचयुग्मे यत्राद्यं चतुष्कं वर्णचतुष्टयं अगुरु स्याच्चत्वारो वर्णा लघवः सन्ति ततो द्वौ पञ्चमषष्ठौ गुरू दीर्घौ भवतस्तदा शशिवदना चरणचतुष्टयेष्विदं लक्षणं असाविति संबन्धः। घनं कठिनं कुचयुग्मं यस्याः सा घनकुचयुग्मा तस्याः संबुद्धौ । तथा चोक्तं रत्नाकरे । शशिवदनान्यौ ॥८॥ शशिवदना । चरणाक्ष० ६, ग० नं, य ॥

हे सघनउरोजवति ! जिसमें पहिले चार अक्षर लघु और तदनन्तर पांचमे और छठे यह दो अक्षर दीर्घ हों उस्को शशिवदना छन्द कहते हैं ॥ ८ ॥

मदलेखाछन्दः ।

तुर्यं पञ्चमकं चेद्यत्र स्याल्लघु बाले ॥
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥

सप्ताक्षरजातौ मदलेखालक्षणमाह । तुर्यमिति ॥ हे मृगनेत्रे यदि तुर्यं चतुर्थं पञ्चमकं पञ्चमं लघु स्यात् हे बाले नवयौवने विद्वद्भिः पण्डितैः सा मदलेखा प्रोक्ता । मृगस्य नेत्रे इव नेत्रे यस्याः सा मृगनेत्रा तस्याः संबुद्धौ । उक्तं रत्नाकरे । मसौ गः स्यान्मदलेखा ॥ ९ ॥ मदलेखा । चरणाक्ष० ७, ग० म, स, ग ॥

हे मृगनयनी ! तरुणि !! यदि चतुर्थ और पञ्चमवर्ण लघु हों तौ विद्वानोंद्वारा मदलेखा छन्द कहाजाता है ॥ ९ ॥

अष्टाक्षरजाति (अनुष्टुबादि) छन्दः ।

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ॥
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ १० ॥

अष्टाक्षरजातौ पद्यलक्षणमाह श्लोक इति ॥ अन्ययोः प्रथमतृतीयपादयोः सप्तममक्षरं गुरु द्विमात्रकं भवति । स-

र्वत्र चतुर्ष्वपि चरणेषु पञ्चममक्षरं लघु स्यात् । षष्ठं गुरु स्यात् । द्विचतुष्पादयोर्द्वितीयचतुर्थचरणयोः सप्तममक्षरं ह्रस्वं ज्ञेयम् । ईदृग्विधे श्लोके पद्येऽनुष्टुबादयो भवन्ति ॥१०॥

जिसके अन्य (प्रथम-तृतीय) चरणमें सप्तम वर्ण गुरु हों, और चारों चरणोंमें छठा अक्षर गुरु तथा पांचमा लघु हो, और द्वितीय तथा चतुर्थ चरणमें सप्तम वर्ण लघु हो उसे श्लोक (अनुष्टुप्) आदिक जानना ॥ १० ॥

पद्यछन्दोलक्षणम् ।

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ॥
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥ ११ ॥

अथ पद्यलक्षणमाह ॥ पञ्चममिति ॥ एतत्पद्यस्य लक्षणं विजानीयात् । यत्र सर्वत्र चरणेषु पञ्चमं लघु भवति । द्विचतुर्थचरणयोः द्वितीयचतुर्थचरणयोः सप्तममक्षरं लघु भवति । सर्वत्र चरणेषु षष्ठं अक्षरं गुरु भवति ॥ ११ ॥
पद्यं । चरणाक्ष० ८, गणनियमो नास्ति ॥

जिसके चारों चरणोंमें पञ्चम वर्ण तौ ह्रस्व हो और दूसरे तथा चौथे चरणमें सातमा अक्षर लघु (ह्रस्व) हो, और चारों पादोंमें छठा अक्षर गुरु हो उसे पद्य जानना चाहिये ॥ ११ ॥

माणवकं छन्दः ।

आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम् ॥
स्याद्गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥१२॥

माणवकाक्रीडलक्षणमाह । आदिगतमिति । तदिदं माणवकाक्रीडं कथितं कविभिरित्यध्याहार्यम् । आदिगतं प्रथमं तुर्यगतं चतुर्थं पञ्चमकं पञ्चमं अन्त्यगतं अन्त्यस्थितमष्टमं गुरु स्यात्तदिदं माणवकाक्रीडं बुधा वदन्ति । तथाचोक्तं

रत्नाकरे । माणवकं भस्तलगाः ॥ १२ ॥ माणवकं । चरणाक्ष० ८, ग० भ, त; ल, ग ॥

जिसमें प्रथम चतुर्थ और पंचम तथा अन्त्य (अष्टम) अक्षर गुरु हो उसको माणवकाक्रीड छन्द कहते हैं ॥ १२ ॥

प्रमाणिका, नगस्वरूपिणी ।

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ॥
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥१३॥

अथ नगस्वरूपिणीलक्षणमाह ॥ द्वितुर्येति ॥ बुधाः पण्डिताः तदानीं नगस्वरूपिणीं निवेदयन्ति । तदा कदा । यदा द्वितीयं तुर्यं चतुर्थं षष्ठं अष्टमं चाक्षरं गुरु प्रयोजितं गुरुसंज्ञकं भवति एतादृशीं तां नगस्वरूपिणीं निवेदयन्ति । तथाचोक्तं रत्नाकरे । प्रमाणिका जरौ लगौ ॥ १३ ॥ प्रमाणिका, नगस्वरूपिणीति वा । च० अ० ८, ग० ज, र; ल, ग ॥

जब द्वितीय चतुर्थ छठा और आठमा अक्षर गुरु प्रयोग किया जाता है, तब उसको पण्डित महाशय नगस्वरूपिणी कहते हैं ॥ १३ ॥

विद्युन्मालाछन्दः ।

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ॥
विद्वद्वृन्दैर्वीणावाणि व्याख्याता सा विद्युन्माला॥१४॥

अथ विद्युन्मालालक्षणमाह ॥ सर्वे वर्णा इति ॥ हे वीणावाणि विद्वद्वृन्दैः पण्डितसमूहैः सा विद्युन्माला व्याख्याता । वीणायाः वाणीव वाणी यस्याः सा वीणावाणी तस्याः संबुद्धौ । विदुषां पण्डितानां वृन्दानि समूहास्तैः । सा का । यस्यां सर्वे वर्णाः दीर्घाः गुरुभूताः भवन्ति । वेदैर्वेदैश्चतुर्भिश्चतुर्भिर्विश्रामो भवतीति सा विद्युन्माला । तथाचोक्तं

रत्नाकरे । मो मो गो गो विद्युन्माला ॥ १४ ॥ विद्युन्माला । च० अ० ८, ग० म, म; ग, ग; यतिः ४, ४, ॥

जिसमें सबही वर्ण दीर्घ हों और चार चार अक्षरोंके ऊपर विराम (स्थिति) हो, हे मृदुभाषिणि ! पण्डितसमाजोंने उसको विद्युन्मालानामसे व्याख्यान किया है ॥ १४ ॥

चम्पकमालाछन्दः ।

तन्वि गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यम् ॥
इन्द्रियबाणैर्यत्र विरामः सा कथनीया चम्पकमाला १५॥

अथ दशाक्षरजातौ चम्पकमालालक्षणमाह ॥ तन्वीति ॥ हे तन्वि तन्वङ्गि सा चम्पकमाला कथनीया । सा का । यत्र यस्यां आद्यचतुर्थं प्रथमं चतुर्थं पञ्चमषष्ठं अन्त्यं दशमं उपान्त्यं नवमं एते गुरवो भवन्ति । यत्र इन्द्रियबाणैः पञ्चभिः पञ्चभिरक्षरैर्विरामो विश्रामः । सा चम्पकमाला कथनीया । आद्यचतुर्थं पञ्चमषष्ठं इत्येकत्वे द्विगुद्वन्द्वौ । इन्द्रियाणि च बाणाश्च इन्द्रियबाणास्तैः । तथा चोक्तं रत्नाकरे । चम्पकमाला चेद्भमसागः ॥ १५ ॥ चम्पकमाला । च० अ० १०, ग० भ, म, स; ग; यतिः ५, ५ ॥

हे तन्वङ्गि ! जिसमें प्रथम और चतुर्थ पञ्चम और षष्ठ तथा उपान्त्य (नवम) अक्षर गुरु हो और पांच पांच वर्णोंपर जिसमें विराम हो उसको चम्पकमाला कहना चाहिये ॥ १५ ॥

मणिबन्धछन्दः ।

चम्पकमाला यत्र भवेदन्त्यविहीना प्रेमनिधे ॥
छन्दसि दक्षा ये कवयस्तन्मणिबन्धं ते ब्रुवते॥१६॥

अथ नवाक्षरजातौ मणिबन्धलक्षणमाह ॥ चम्पकमालेति ॥ हे प्रेमनिधे छन्दसि छन्दोग्रन्थे ये दक्षाः कुशलास्ते कवयस्त-

न्मणिबन्धसंज्ञकं ब्रुवते । यत्रान्त्यविहीना चम्पकमाला भवेत्। चम्पकमाला तु दशाक्षरा । इदं नवाक्षरं भवेत् । लक्षणं तु तदेव चम्पकमालागतमेव तन्मणिबन्धम् । प्रेम्णः निधिरिव निधिः तस्याः संबुद्धौ । अन्त्यविहीनः अन्ते भवोऽन्त्यो वर्णः तेन विहीना त्यक्ता भवेत् । तदुक्तं रत्नाकरे । भ्मौ सयुक्तौ रुक्मवती ॥ १६ ॥ मणिबन्धम् । च० अ० ९, ग० भ, म, स; यतिः ५, ४ ॥

हे प्रिये ! जिसमें अन्त्यवर्णरहित चम्पकमालाका लक्षण हो उसको छन्दशास्त्रमें निपुणजन मणिबंधसंज्ञक छन्द कहते हैं ॥ १६ ॥

शालिनीछन्दः ।

ह्रस्वो वर्णो जायते यत्र षष्ठः
कम्बुग्रीवे तद्वदेवाष्टमान्त्यः ॥
विश्रामः स्यात्तन्वि वेदैस्तुरङ्गै-
स्तां भाषन्ते शालिनीं छान्दसीयाः ॥ १७ ॥

एकादशाक्षरजातौ शालिनीमाह ॥ ह्रस्व इति ॥ हे तन्वि कृशाङ्गि छान्दसीयाः छन्दसि कुशलास्तां शालिनीं भाषन्ते । तां कां हे कम्बुग्रीवे यत्र यस्यां षष्ठो वर्णो ह्रस्वः तद्वदष्टमान्त्यः नवमः ह्रस्वो जायते । यत्र वेदैश्चतुर्भिस्तुरङ्गैः सप्तभिर्विश्रामस्तां शालिनीं भाषन्ते ब्रुवते । कम्बोः शङ्खस्य ग्रीवावद्ग्रीवा यस्याः सा तत्संबुद्धौ । 'कम्बुग्रीवा त्रिरेखा स्यात्' इत्यमरः । तदुक्तं रत्नाकरे । शालिन्युक्ता म्तौ तगौ गो ॥ १७ ॥ शालिनी । चर० अ० ११ ग० म, त, त; ग, ग; यतिः ४, ७ ॥

हे सूक्ष्माङ्गि ! जिसमें छठा अष्टमान्त्य (नवम) अक्षर ह्रस्व

हो, तथा हे मंजुकण्ठि ! चार और सात अक्षरोंके ऊपर विराम हो पण्डित जन उसको शालिनी छन्द कहते हैं ॥ १७ ॥

मन्दाक्रान्ताछन्दः ।

चत्वारः प्राक्सुतनु गुरवो द्वौदशैकादशौ चे-
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ ॥
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां संगिरन्ते ॥१८॥

चत्वार इति ॥ हे सुतनु सुष्ठु तनुः कायो यस्याः सा तस्याः संबोधनं हे सुतनु । प्रवरकवयः श्रेष्ठकवयः तां मन्दाक्रान्तां वदन्ति । तां कां ! चेद्यदि यत्र यस्यां प्रागादौ चत्वारो वर्णा गुरवो भवन्ति । हे मुग्धे च पुनः द्वौदशैकादशौ वर्णौ गुरू भवतः हे कुमुदामोदिनि च पुनः तदनु द्वादशान्त्या त्र-योदशचतुर्दशौ वर्णौ गुरू भवतः । च पुनः अन्त्यौ तद्वद्भ-वतः । हे कान्ते च पुनः युगरसहयैश्चतुःषट्सप्तभिः क्रमेण विरामो भवति । प्रवरकवयस्तद्विदः ॥ १८ ॥ मन्दाक्रान्ता । च० अ० १७, ग० म, भ, न, त, त; ग, ग; यतिः ४, ६, ७ ॥

हे सुभगे ! जिसमें पहिले चार अक्षर गुरु हों, तदनन्तर हे मुग्धे ! बारमें और ग्यारमें दो अक्षर गुरु हों, पुनः हे कुमुद-वासिनि ! तेरहवें और चौदहवां यह दो अक्षर गुरु हों, तथा हे कान्ता ! अन्त्यके दो अक्षरभी गुरु हों, और चार–छै तथा सात सात वर्णोंके ऊपर विराम हो, हे तन्वङ्गि ! श्रेष्ठ कवीश्वर उसे मन्दाक्रान्ता कहते हैं ॥ १८ ॥

हंसीछन्दः ।

मन्दाक्रान्तान्त्ययतिरहिता सालंकारे भवति यदि सा ।
तद्विद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने ॥ १९ ॥

हंस्या लक्षणमाह ॥ मन्दाक्रान्तेति ॥ हे कमलवदने तत्तदा ध्रुवं निश्चयेन हंसी ज्ञेया ज्ञातव्या । कमलवत्सौन्दर्यं सौरभादिगुणैः कमलसदृशं वदनं मुखं यस्याः सा तत्संबोधनम् । कथंभूता हंसी विद्वद्भिः पण्डितैरभिहिता कथिता । तदा कदा हे सालंकारे । यदि मन्दाक्रान्ता अन्त्ययतिरहिता अन्ते भवा अन्त्या मन्दाक्रान्तायां युगरसहयैः विश्रामः सान्त्यरहिता दशवर्णात्मिका सा हंसी ज्ञेया । लक्षणं मन्दाक्रान्ताया एव । अलंकारेण आभूषणेन सह वर्तमाना सालंकारा तस्याः संबोधनं हे सालंकारे ॥ १९ ॥ हंसी । च० अ० १०, ग० म, भ, न; ग; यतिः ४, ६ ॥

हे अलङ्कारवति! जब मन्दाक्रान्ताही अन्त्यवर्णरहित हो तौ हे कमलमुखि! उसको विद्वानोंद्वारा कहाहुवा निश्चय हंसी छन्द जानो, अर्थात्–मन्दाक्रान्ताका विराम चार छै और सात अक्षरके ऊपर होता है, परंतु–इसके प्रतिपादमें विरामके अर्थ सप्तम वर्ण नहीं होता, शेष संपूर्ण मन्दाक्रान्ताका लक्षण होता है॥१९॥

दोधकवृत्तम् ।

आद्यचतुर्थमहीननितम्बे सप्तमकं दशमं च तथान्त्यम् ।
यत्र गुरु प्रकटस्मरसारे तत्कथितं ननु दोधकवृत्तम्२०

अथ दोधकवृत्तलक्षणमाह ॥ आद्यचतुर्थमिति ॥ हे प्रकटस्मरसारे कविभिः तत् ननु दोधकवृत्तं कथितं । प्रकटः स्मरसारः कामबलं यस्याः सा तस्याः संबोधनम् । हे अहीननितम्बे अहीनौ स्थूलौ नितम्बौ कटिपश्चाद्भागौ यस्याः सा तत्संबुद्धौ । यत्र यस्मिन् आद्यचतुर्थं प्रथमं चतुर्थं सप्तमकं सप्तमं दशमं तथा अन्त्यं एकादशं एतानि अक्षराणि गुरूणि सन्ति । तदुक्तं रत्नाकरे । दोधकवृत्तमिदं भभभागैः ॥२०॥ दोधकं । च० अ० ११, ग० भ, भ; भ, ग, ग ॥

हे पुष्टनितम्बे ! जिसमें प्रथम चतुर्थ तथा सप्तम दशम और अन्त्य (ग्यारहमा) यह अक्षर गुरु हों, हे स्फुटकामवति ! ऊसको निश्चय दोधकवृत्त (छन्द) कहते हैं ॥ २० ॥

इन्द्रवज्राछन्दः ।

यस्यां त्रिषट्सप्तममक्षरं स्याद्ध्रस्वं सुजङ्घे नवमं च तद्वत् । गत्या विलज्जीकृतहंसकान्ते तामिन्द्रवज्रां ब्रुवते कवीन्द्राः

अथेन्द्रवज्रालक्षणमाह ॥ यस्यामिति ॥ हे गत्या विलज्जीकृतहंसकान्ते कवीन्द्रास्तामिन्द्रवज्रां ब्रुवते । गत्या गमनेन विलज्जीकृता हंसस्य कान्तिः शोभा यया सा तस्याः संबोधनम् । तां कां यस्यां त्रिषट्सप्तममक्षरं ह्रस्वं स्यात् तद्वन्नवमं ह्रस्वं स्यात् । हे सुजङ्घे तामिति संबन्धः । एतादृशीं इन्द्रवज्रां ब्रुवते । सुष्ठु शोभने जङ्घे यस्याः सा तत्संबुद्धौ । कवीनां कविषु वा इन्द्राः पूज्या बृहस्पत्यादयः । तदुक्तं रत्नाकरे । स्यादिन्द्रवज्रा यदि तौ जगौ गः ॥ २१ ॥ इन्द्रवज्रा । च० अ० ११, ग० त, त, ज; ग; ग; यतिः ५, ६ ॥

हे सुभगजघने ! जिसमें तीसरा छठा और सातमा तथा नवम अक्षर न्हस्व हो, हे मत्तगामिनि ! कवीश्वर उसको इन्द्रवज्रा छन्द कहते हैं ॥ २१ ॥

उपेन्द्रवज्रा ।

यदीन्द्रवज्राचरणेषु पूर्वे भवन्ति वर्णा लघवः सुवर्णे ॥ अमन्दमाद्यन्मदने तदानीमुपेन्द्रवज्रा कथिता कवीन्द्रैः

अथोपेन्द्रवज्रालक्षणमाह ॥ यदीति ॥ हे अमन्दमाद्यन्मदने तदानीं कवीन्द्रैः यदीन्द्रवज्राचरणेषु पूर्वे वर्णा लघवः सन्ति शेषमिन्द्रवज्रावत् आद्यवर्णं ह्रस्वमेवेति शेषः । चतुर्ष्वपि पादेषु आद्यो ह्रस्वः हे सुवर्णे सा उपेन्द्रवज्रा

कथिता । अमन्दं बहुलं माद्यन् हर्षं कुर्वन्मदनो यस्यां सा तत्संबुद्धौ । तथा चोक्तं रत्नाकरे । उपेन्द्रवज्रा जतजास्ततो गौ ॥ २२ ॥ उपेन्द्रवज्रा । च० अ० ११, ग० ज, त, ज; ग, ग; यतिः ५, ६ ॥

हे गौराङ्गि ! यदि इन्द्रवज्राहीके चारों पादों [चरणों] में पहिले अक्षर लघु [ह्रस्व] हो, हे विशेष कामके हर्षवाली ! वोह कवीश्वरोंद्वारा उपेन्द्रवज्रा छन्द कहा जाता है (इसका लक्षण इन्द्रवज्राहीका जानो) ॥ २२ ॥

उपजाति ।

यत्र द्वयोरप्यनयोस्तु पादा
भवन्ति सीमन्तिनि चन्द्रकान्ते ॥
विद्वद्भिराद्यैः परिकीर्तिता सा
प्रयुज्यतामित्युपजातिरेषा ॥ २३ ॥

उपजातिलक्षणमाह ॥ यत्रेति ॥ हे चन्द्रकान्ते सा एषा उपजातिरिति प्रयुज्यताम् । कथंभूता सा । आद्यैः पुरातनैर्विद्वद्भिः पण्डितैः परिकीर्तिता कथिता । सा का हे सीमन्तिनि ! यत्र द्वयोरनयोरिन्द्रवज्रोपेन्द्रवज्रयोरपि पादाः यथाक्रमेण भवन्ति । प्रथमे तृतीये च इन्द्रवज्रालक्षणं द्वितीये चतुर्थे च उपेन्द्रवज्रालक्षणम् । सीमन्तः केशवेशो विद्यते यस्याः सा तत्संबुद्धौ । चन्द्रवत्कान्तिर्यस्याः सा तत्संबुद्धौ पक्षे चन्द्रवत्कान्ता कमनीया या सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ २३ ॥ उपजातिः । च० अ० ११, प्रथमे तृतीये च चरणे इन्द्रवज्रा द्वितीये चतुर्थे चोपेन्द्रवज्रेत्यर्थः ॥

हे सुकेशि ! जिसमे उक्त दोनो-(इन्द्रवज्राऔर उपेन्द्रवज्रा) छन्दोंके चरण हों (पहिले और तीसरेमें इन्द्रवज्राके, दूसरे और चौथेमे उपेन्द्रवज्राके चरण हों) उसको हे चन्द्रकान्ते ! प्राचीन विद्वानोंद्वारा कहाहुआ उपजाति छन्द जानो ॥ २३ ॥

आख्यानकीछन्दः ।

आख्यानकी स्यात्प्रकटीकृतार्थे
यदीन्द्रवज्राचरणः पुरस्तात् ॥
उपेन्द्रवज्राचरणास्त्रयोऽन्ये
मनीषिणोक्ता विपरीतपूर्वा ॥ २४ ॥

अथाख्यानकीलक्षणमाह ॥ आख्यानकीति ॥ हे प्रकटीकृतार्थे मनीषिणा विदुषा यदि इन्द्रवज्रावत्प्रथमचरणः स्यात् । अन्ये त्रयश्चरणा उपेन्द्रवज्रावत्सन्ति तदा विपरीतपूर्वाख्यानकी विपरीताख्यानकीत्यर्थः । प्रकटीकृतोऽर्थः कामलक्षणो यया सा तत्सम्बुद्धौ । इयं वृत्तरत्नाकरे । नोक्ता तथापि पिङ्गलादिभिराचार्यैर्हलायुधादावुक्तैव ॥ २४ ॥ आख्यानकी । च० अ० ११, प्रथमचरण इन्द्रवज्रावत् अन्ये उपेन्द्रवज्रावत् ॥

हे कामिनी ! यदि प्रथम चरण तो इन्द्रवज्राका हो और अन्य तीन चरण उपेन्द्रवज्रा छन्दके हों, उसको विद्वानोंद्वारा कहाहुआ विपरीतपूर्वा अर्थात्—आख्यानकी छन्द जानो ॥ २४ ॥

---

१ इसका लक्षण श्रीकेदारभट्टने वृत्तरत्नाकरमे नहीं लिखा, परन्तु विपरीतपूर्वाका लक्षण तो श्रीकेदारभट्टने वृत्तरत्नाकरमें और श्रीचिरञ्जीवभट्टाचार्यने वृत्तरत्नावलीमें समानही लिखाहै ॥

रथोद्धताछन्दः ।

आद्यमक्षरमतस्तृतीयकं
सप्तमं च नवमं तथान्तिमम् ॥
दीर्घमिन्दुमुखि यत्र जायते
तां वदन्ति कवयो रथोद्धताम् ॥ २५ ॥

अथ रथोद्धतालक्षणमाह ॥ आद्यमिति ॥ हे इन्दुमुखि ! कवयः तां रथोद्धतां वदन्ति । कां यत्राद्यमक्षरमतस्तृतीयकं सप्तमं नवमं तथान्तिमं एकादशं एते वर्णा दीर्घा द्विमात्रका जायन्ते । इन्दुवन्मुखं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । रान्नराविह रथोद्धता लगौ ॥ २५ ॥ रथोद्धता। च० अ० ११, ग० र, न, र; ल, ग; यतिः ७, ४ ॥

हे चन्द्रमुखि ! जिसमें पहिला-तिसरा-सातमा और नौमा तथा अन्तका(ग्यारहवां) यह अक्षर दीर्घ हों कवीश्वर महाशय उसको रथोद्धता छन्द कहतेहैं ॥ २५ ॥

स्वागताछन्दः ।

अक्षरं च नवमं दशमं चेद्व्यत्ययाद्भवति यत्र विनीते ॥
प्रोक्तमेणनयने यदि सैव स्वागतेति कविभिः कथितासौ

स्वागताया लक्षणमाह ॥ अक्षरमिति ॥ हे एणनयने सैषा रथोद्धता तदा कविभिः स्वागतेति कथिता । हे विनीते नम्रीभूते ! यदि यत्र यस्यां व्यत्ययाद्वैपरीत्येन नवममक्षरं दशमवद्दशमं नवमवत् नवमो लघुः दशमो गुरुः द्वौ चकारौ विपरीतार्थसूचकौ । एणस्य नयने इव नयने यस्याः सा तस्याः संबुद्धौ । अयमर्थः रथोद्धतायां नवमं अक्षरं गुरु भवति दशमं चाक्षरं लघु भवति । स्वागतायां तु नवममक्षरं लघु दशमं चाक्षरं गुरु भवतीति भावः । तदुक्तं र-

त्नाकरे । स्वागतेति रनभाद्गुरुयुग्मम् ॥ २६ ॥ स्वागता । च० अ० ११, ग० र, न, भ ग, ग; यतिः ७, ४ ॥

हे विनयवति ! जिस [रथोद्धता]में विपरीततासे[1] नवम और दशम अक्षर लघु और गुरु हों, हे हरिणनयनि ! पण्डितोंने उसका स्वागता नाम कहाहै ॥ २६ ॥

वैश्वदेवीछन्दः ।

ह्रस्वो वर्णः स्यात्सप्तमो यत्र बाले
तद्वद्बिम्बोष्ठि न्यस्त एकादशाद्यः ॥
बाणैर्विश्रामस्तत्र चेद्वा तुरङ्गै-
र्नाम्ना निर्दिष्टा सुभ्रु सा वैश्वदेवी ॥२७॥

अथ वैश्वदेवीलक्षणमाह ॥ ह्रस्व इति ॥ यत्र सप्तमो वर्णो ह्रस्वः स्यात् । हे बाले षोडशवर्षाभ्यन्तरवयस्के तद्व-त्पूर्वोक्तप्रकारवत् । हे बिम्बोष्ठि एकादशाद्यो दशमो वर्णो ह्रस्वः स्यात् । एवं न्यस्तः निक्षिप्तः स्याच्चेद्यदि तत्र बाणैः पञ्चभिस्तुरङ्गैः सप्तभिश्च विश्रामः स्यात् । हे सुभ्रु सा नाम्ना वैश्वदेवी निर्दिष्टा कथिता । सुष्ठु भ्रुवौ यस्याः सा तस्याः संबुद्धौ । बिम्बवदोष्ठौ यस्याः सा एकादशादौ जात एकादशाद्यः ॥ तदुक्तं रत्नाकरे । पञ्चाश्वैश्छिन्ना वैश्वदेवी मौ यौ ॥ २७ ॥ वैश्वदेवी । च० अ० १२, ग० म, म, य, य; यतिः ५, ७ ॥

हे बाले ! जिसमें सप्तम और दशम यह दो अक्षर ह्रस्व हों, और हे बिम्बोष्ठि ! पांच वा सात अक्षरके ऊपर विश्राम हो, उसको वैश्वदेवी छन्द कहाहै ॥ २७ ॥

---

[1] रथोद्धता छन्दमे नवम अक्षर गुरु और दशम लघु होता है, स्वागतामें नवम लघु और दशम गुरु होता है ॥

तोटकवृत्तम् ।

सतृतीयकषष्ठमनन्तरते नवमं विरतिप्रभवं गुरु चेत् ॥
घनपीनपयोधरभारनते ननु तोटकवृत्तमिदं कथितम् २८

द्वादशाक्षरजातौ तोटकलक्षणमाह ॥ सतृतीयकेति ॥ हे घनपीनपयोधरभारनते ! ननु इह निश्चितं तोटकवृत्तं कथितं वर्णितम् । चेद्यदि हे अनन्तरते ! सतृतीयकं षष्ठं नवमं गुरु स्यात्तृतीयं षष्ठं च तृतीयषष्ठे ताभ्यां सह वर्तत इति । कीदृशं विरतिप्रभवं अन्त्यं द्वादशं गुरु स्यात् । अनन्ता अपरिमिता रतिर्यस्याः सा अनन्तरता तत्संबुद्धौ । घनौ च पीनौ च घनपीनौ कठिननिबिडौ पयोधरौ च तयोर्भारः आधिक्यं तेन नता नम्रीभूता या सा तत्संबुद्धौ । विरते प्रभव उत्पत्तिर्यस्य तत्तथोक्तम् । तदुक्तं रत्नाकरे । इह तोटकमंबुधिसैः कथितम् ॥ २८ ॥ तोटकम् । च० अ० १२, ग० स, स, स, स; यतिः ६, ६ ॥

हे अत्यन्तप्यारी ! जिसमे तीसरा छटा और नवमा तथा अन्त्यका [बारहमा] यह अक्षर दीर्घ हों, हे सघन और पुष्ट उरोजोंके भारसे नम्र हुईवाले ! उसको तोटकवृत्त कहतेहैं॥२८॥

भुजङ्गप्रयातं छन्दः ।

यदाद्यं चतुर्थं तथा सप्तमं चे-
त्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ॥
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे
तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥ २९ ॥

भुजङ्गप्रयातलक्षणमाह ॥ यदाद्यमिति ॥ हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे ! कवीन्द्रैस्तच्छन्दो भुजङ्गप्रयातमुक्तं कथितम् । किं चेद्यदा आद्यं प्रथमं तथा चतुर्थं तथा सप्तमं एव

निश्चितं एकादशाद्यं एकादशस्यादिभूतं दशममक्षरं ह्रस्वं स्यादिति संबन्धः । शरदः चन्द्रः शरच्चन्द्रः तस्य विद्वेषि वक्त्रमेवारविन्दं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः ॥ २९ ॥ भुजङ्गप्रयातम् । च० अ० १२, ग० य, य, य, य; यतिः ६, ६ ॥

हे प्रसन्नमुखि ! [कमलवदने !] जहां प्रथम चतुर्थ तथा सप्तम और दशम यह अक्षर ऱ्हस्व हों उसको कवीश्वरोंनें भुजङ्गप्रयात छन्द कहाहै ॥ २९ ॥

द्रुतविलम्बितं छन्दः ।

अयि कृशोदरि यत्र चतुर्थकं
गुरु च सप्तमकं दशमं तथा ॥
विरतिजं च तथैव विचक्षणै-
र्द्रुतविलम्बितमित्युपदिश्यते ॥ ३० ॥

द्रुतविलम्बितलक्षणमाह ॥ अयि कृशोदरीति ॥ अयि कोमलालापे विचक्षणैः पण्डितैर्द्रुतविलम्बितमित्युपदिश्यते । इति किं हे कृशोदरि ! यत्र चतुर्थकं चेत्सप्तमकं तथा दशमं इमान्यक्षराणि गुरूणि सन्ति । विरतिजं अन्त्यं द्वादशं गुरु स्यादित्यर्थः । कृशमुदरं यस्याः सा कृशोदरी तत्संबुद्धौ । तदुक्तं रत्नाकरे । द्रुतविलम्बितमाह नभौ भरौ ॥ ३० ॥ द्रुतविलम्बितम् । च० अ० १२, ग० न, भ, भ, र ॥

अयि कृशोदरि ! जिसमें चतुर्थ सप्तम तथा दशम और अन्त्यज (बारहवां) यह अक्षर गुरु (दीर्घ) हों, उसको पण्डितलोग द्रुतविलम्बित छन्द कहतेहैं ॥ ३० ॥

प्रमिताक्षराछन्दः ।

यदि तोटकस्य गुरु पञ्चमकं
विहितं विलासिनि तदक्षरकम् ॥
रससंख्यकं गुरु न चेदबले
प्रमिताक्षरेति कविभिः कथिता ॥ ३१ ॥

प्रमिताक्षरालक्षणमाह ॥ यदि तोटकस्येति ॥ हे अबले! कविभिः प्रमिताक्षरा इति कथिता । किं हे विलासिनि! यदि तोटकस्य उक्तलक्षणकस्य पञ्चमकं वर्णं गुरु विहितं स्यात् । रससंख्यकं षष्ठं गुरु न चेत् गुरु तु पञ्चममेव । सा प्रमिताक्षरेत्यर्थः । विलासो विभ्रमो यस्याः सा विलासिनी तत्संबुद्धौ । तदुक्तं रत्नाकरे । प्रमिताक्षरा सजससैरुदिता ॥ ३१ ॥ प्रमिताक्षरा ॥ च० अ० १२, ग० स, ज, स, स ॥

हे विभ्रमवति! यदि तोटक छन्दका पंचमवर्ण गुरु हो, औ छठा अक्षर लघु हो, हे अबले! उसको प्रमिताक्षरा छन्द कहाहै ॥ ३१ ॥

हरिणीप्लुताछन्दः ।

प्रथमाक्षरमाद्यतृतीययो-
र्द्रुतविलम्बितकस्य च पादयोः ॥
यदि चेन्न तदा कमलेक्षणे
भवति सुन्दरि सा हरिणीप्लुता ॥ ३२ ॥

अथ हरिणीप्लुतालक्षणमाह ॥ प्रथमाक्षरमिति ॥ हे कमलेक्षणे! सुकविभिः तदेयं हरिणीप्लुता कथिता । यदि द्रुतविलम्बितकस्य छन्दसः आद्यतृतीययोः पादयोः प्रथमाक्षरं चेत् एकादशाक्षरमेवं विषमपादयोः तदेयं हरिणीप्लुता ।

कमलवदीक्षणे यस्याः सा तत्संबुद्धौ हे सुन्दरि शुभाङ्गे ! । तदुक्तं रत्नाकरे १, ३; सौ स्लौ गः । २, ४; भ्रौ भ्रौ । पक्षे हरिणीप्लुता ॥ ३२ ॥ हरिणीप्लुता ॥ च० १, ३; अ० ११, ग० स, स; स; ल, ग ॥ २, ४; अ० १२, ग० न, भ, भ, र ॥

हे कमलनयने ? जिसमे द्रुतविलम्बित छन्दके प्रथम और तृतीयपादके [प्रथम–तृतीयपादमे–] आदिका अक्षर हो, तौ सुन्दरि ! उसको हरिणीप्लुता कहतेहैं ॥ ३२ ॥

वंशस्थं वृत्तम् ।

उपेन्द्रवज्राचरणेषु सन्ति चे-
दुपान्त्यवर्णा लघवः कृता यदा ॥
मदोल्लसद्भ्रूजितकामकार्मुके
वदन्ति वंशस्थमिदं बुधास्तदा ॥ ३३ ॥

वंशस्थलक्षणमाह ॥ उपेन्द्रवज्रेति ॥ हे मदोल्लसद्भ्रूजितकामकार्मुके ! तदा बुधा इदं वंशस्थं वदन्ति । तदा कदा । यदा उपेन्द्रवज्राचरणेषु उपान्त्यवर्णाः अन्त्यसमीपस्था वर्णा एकादशसंज्ञका लघवः सन्ति प्रतिचरणे एकादशो वर्णो लघुस्तदा वंशस्थम् । मदेन उल्लसन्तौ भ्रुवौ ताभ्यां जितं कामकार्मुकं मदनधनुर्यया सा तत्संबुद्धौ । अन्त्यस्य समीपमुपान्त्यम् । उपान्त्ये भवा उपान्त्याः । उपान्त्याश्च ते वर्णाश्चेति । तदुक्तं रत्नाकरे । जतौ तु वंशस्थमुदीरितं जरौ ॥ ३३ ॥ वंशस्थम् ॥ च० अ० १२, ग० ज, त, ज, र; यतिः ५, ७ ॥

हे तिर्छी चितवनवाली ! यदि उपेन्द्रवज्रा छन्दके चारों चरणोंमें ग्याहरवें अक्षर लघु हों, तब उसकों पण्डितजन वंशस्थवृत्त (छन्द) कहतेहैं ॥ ३३ ॥

इन्द्रवंशाछन्दः ।

यस्यामशोकाङ्कुरपाणिपल्लवे
वंशस्थपादा गुरुपूर्ववर्णकाः ॥
तारुण्यहेलारतिरङ्गलालसे
तामिन्द्रवंशां कवयः प्रचक्षते ॥ ३४ ॥

इन्द्रवंशालक्षणमाह ॥ यस्यामशोकेति ॥ हे तारुण्यहेलारतिरङ्गलालसे ! कवयो यस्यां वंशस्थपादा गुरुपूर्ववर्णका भवन्ति । हे अशोकाङ्कुरपाणिपल्लवे ! तामिन्द्रवंशां प्रचक्षते ब्रुवते । अशोकाङ्कुरवत्पाणिपल्लवौ यस्याः सा । तारुण्यस्य हेलास्ताभी रतिरङ्गे लालसा अभिलाषो यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । स्यादिन्द्रवंशा तौ ज्रौ ॥ ३४ ॥ इन्द्रवंशा ॥ च० अ० १२, ग० त, त, ज, र; यतिः ५, ७ ॥

हे पाणिपल्लववाली वल्लभे! जिसमें वंशस्थवृत्तके पादोंके प्रथम वर्ण गुरु हो, उसे हे विलासिनि ! कवीश्वर इन्द्रवंशा कहतेहैं ३४

प्रभावतीछन्दः ।

यस्यां प्रिये प्रथमकमक्षरद्वयं
तुर्यं तथा गुरु नवमं दशान्तिकम् ॥
सांत्यं भवेद्यदि विरतिर्युगग्रहैः
सा लक्षिता ह्यमृतलते प्रभावती ॥ ३५ ॥

त्रयोदशाक्षरजातौ प्रभावतीलक्षणमाह ॥ यस्यामिति ॥ हे अमृतलते ! यस्यां प्रथममक्षरद्वयं तुर्यं तथा चतुर्थं तथा नवमं दशान्तिकं दशसहितं त्रयोदशं वर्णं युगग्रहैश्चतुर्भिर्नवभिश्चाक्षरैर्विरतिः सा प्रभावती लक्षिता कथिता । अमृतस्य

लतेव लता या सा तत्संबुद्धौ ॥ ३५ ॥ प्रभावती ॥ च० अ० १३, ग० ज, भ, स, ज, ग; यतिः ४, ९ ॥

हे प्रिये ! जिसमें आदिके दो अक्षर और चतुर्थ नवम और दशम तथा तेहरवां यह अक्षर दीर्घ हों, हे सुधावेलि ! और तथा नवम अक्षरके ऊपर विराम हो उसको प्रभावती छन्द कहतह ३५

प्रहर्षिणीछन्दः ।

आद्यं चेत्रितयमथाष्टमं नवान्त्यं
द्वे चान्त्ये गुरुविरतौ सुभाषिते स्यात् ॥
विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुभगे प्रहर्षिणी सा ॥ ३६ ॥

अथ प्रहर्षिणीलक्षणमाह ॥ आद्यमिति ॥ हे सुदति ! ननु इति निश्चितं आद्यं त्रितयं प्रथमतः वर्णत्रयं अथाऽष्टमं नवान्त्यं दशमं चान्त्ये द्वे द्वादशत्रयोदशाख्ये एते गुरवो भवन्ति । हे सुभाषिते ! महेशनेत्रैर्वर्णत्रयानन्तरं दिग्भिर्दशवर्णानन्तरं च विश्रामः स्यात् सा प्रहर्षिणी विज्ञेया ज्ञातव्या । सुशोभनं भाषणं यस्याः सा । सुशोभना दन्ता यस्याः सा सुदती तत्संबुद्धौ । तदुक्तं रत्नाकरे । म्नौ ज्रौ-गस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ३६ ॥ प्रहर्षिणी ॥ च० अ० १३, ग० म, न, ज, र; ग; यतिः ३, १० ॥

हे मृदुभाषिणि ! जिसकी आदिके तीन अक्षर अनन्तर अष्टम तथा दशम और बाहरवें तेरहवें यह अक्षर गुरु हों, और हे सुभगे ! जिसमें तीन और दश अक्षरोंके पीछे विश्राम हो, उसको निश्चय प्रहर्षिणी छन्द जानना चाहिये ॥ ३६ ॥

वसन्ततिलकाछन्दः ।

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ॥

कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे
कान्ते वसन्ततिलकां किल तां वदन्ति ॥३७॥

चतुर्दशाक्षरजातौ वसन्ततिलकालक्षणमाह ॥ आद्यमिति॥ हे कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे! यत्र आद्यं प्रथमं द्वितीयमपि गुरु चतुर्थं दशमांत्यं एकादशमुपान्त्यं त्रयोदशं अन्त्यं चतुर्दशं एते गुरवः स्युः । हे कान्ते! बुधास्तां वसन्ततिलकां वदन्ति । काम एवाङ्कुशस्तेनाङ्कुशिता वशीकृताः कामिन एव मतङ्गजेन्द्रा यया सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । उक्ता वसन्ततिलका तभजा जगौ गः ॥ ३७ ॥ वसंततिलका ॥ च० अ० १४, ग० त, भ, ज, ज; ग, ग॥

हे कामिनि! यदि प्रथम और द्वितीय तथा चतुर्थ और अष्टम, ग्यारहवां तेरहवां और चौदहवां यह अक्षर गुरु हों, हे कान्ते! पण्डितवर्य उसको वसन्ततिलका छन्द कहतेहैं ॥ ३७ ॥

मालिनीछन्दः ।

प्रथममगुरुषट्कं विद्यते यत्र कान्ते
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् ॥
गिरिभिरथ तुरङ्गैर्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥३८॥

पञ्चदशाक्षरजातौ मालिनीलक्षणमाह ॥ प्रथममिति ॥ हे कांते! यत्र प्रथमं षट्कमगुरु लघ्वेव भवति तदनु दशमं द्वादशान्त्यं त्रयोदशं च लघु । गिरिभिरथ तुरङ्गैरष्टभिः सप्तभिश्च विरामस्तदा सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा कृता । तदुक्तं रत्नाकरे । ननमयययुतेयं मालिनी भोगिलोकैः ॥ ३८ ॥ मालिनी ॥ च० अ० १५, ग० न, न, म, य, य; यतिः ८, ७ ॥

हे कान्ते ? जिसकी आदिके छै अक्षर ऱ्हस्व हों, तदनन्तर दशम और तेहरवां यह अक्षर लघु हों, हे सुन्दरि ? और सात तथा आठ अक्षरोंके ऊपर विराम हो, श्रेष्ठकवीश्वरोंके मनका हरनेवाला वोह छन्द मालिनीनामसे प्रसिद्ध है ॥ ३८ ॥

हरिणीछन्दः ।

सुमुखि लघवः पञ्च प्राच्यास्ततो दशमान्तिकं
तदनु ललितालापे वर्णौ यदि त्रिचतुर्दशौ ॥
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्करकङ्कणे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥३९॥

सप्तदशाक्षरजातौ हरिणीलक्षणमाह ॥ सुमुखीति ॥ हे स्फुरत्करकङ्कणे यत्र प्राच्याः प्रथमाः पञ्चवर्णा लघवः सन्ति । ततो दशमान्तिक एकादशः हे ललितालापे यदि त्रिचतुर्दशौ त्रयोदशचतुर्दशौ लघू स्यातां उपान्त्यः षोडशोऽपि लघुः । रसैः षड्भिर्वेदैश्चतुर्भिरश्वैः सप्तभिश्च विरामः स्यात्तदा सा हरिणी स्मृता । स्फुरन्ति करयोः कङ्कणानि यस्याः सा । ललित आलापो यस्याः सा । उक्तं च रत्नाकरे । रसयुगहयैन्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥ ३९ ॥ च० अ० १७, ग० न, स, म, र, स; ल, ग; यतिः ६, ४, ७ ॥

हे सुमुखि ! जिसकी आदिके पांच वर्ण ह्रस्व हों, तत्पश्चात् एकादश तेरहवां और चौदहवां तथा सोलहवां यह अक्षर लघु हों, और हे मंजुभाषिणि ? जिसमें छै चार और सात अक्षरोंके ऊपर विरति (विराम) होय, हे स्फुरायमाण करकङ्कणवाली ? वोह छन्द हरिणी नामसे कहा गयाहै ॥ ३९ ॥

शिखरिणीछन्दः ।

यदा पूर्वो ह्रस्वः कमलनयने षष्ठकपरा-
स्ततो वर्णाः पंच प्रकृतिसुकुमाराङ्गि लघवः ॥
त्रयोऽन्ये चोपान्त्याः सुतनु जघनाभोगसुभगे
रसै रुद्रैर्यस्यां भवति विरतिः सा शिखरिणी॥४०॥

अथ शिखरिणीलक्षणमाह ॥ यदा पूर्वो ह्रस्व इति ॥ हे सुतनुजघनाभोगसुभगे यदा पूर्वो वर्णो ह्रस्वो भवति । हे प्रकृतिसुकुमाराङ्गि ततः षष्ठकपराः षष्ठतः पञ्च वर्णाः सप्तमाष्टमनवमदशमैकादशा लघवः सन्ति । अन्ये उपान्त्यास्त्रयो वर्णाश्चतुर्दशपञ्चदशषोडशा लघवो भवन्ति । यस्यां रसैः षड्भी रुद्रैरेकादशैर्विरतिर्भवेत् । हे सुतनु सा शिखरिणी कथिता । कमलवन्नयने यस्याः सा । प्रकृत्या स्वभावेन सुकुमाराण्यङ्गानि यस्याः । जघनयोराभोगस्तेन सुभगा । सुशोभना तनुर्यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥४०॥ शिखरिणी । च० अ० १७, ग० य, म, न, स, भ; ल, ग; यतिः ६, ११ ॥

हे कमलनयने ? जब प्रथम वर्ण लघु हो, तदनु—सात आठ नव दश ग्यारह यह पांच अक्षर ह्रस्व हों, तथा हे स्वभावकोमलाङ्गि ? चौदह पन्द्रह सोलह यह तीन अक्षर लघु हों, और हे शोभनाङ्गि ? हे कामिनि ? छै और ग्यारह अक्षरके उपर विश्राम हो, उसको शिखरिणी छन्द कहतेहैं ॥ ४० ॥

पृथ्वीछन्दः ।

द्वितीयमलिकुन्तले यदि षडष्टमं द्वादशं
चतुर्दशमथ प्रिये गुरु गभीरनाभिह्रदे ॥

सपञ्चदशमन्तिकं तदनु यत्र कान्ते यति-
र्गिरीन्द्रफणिभृत्कुलैर्भवति सुभ्रु पृथ्वी हि सा ४१

पृथ्वीलक्षणमाह ॥ द्वितीयमिति ॥ हे सुभ्रु यदि द्वितीय-संख्याकं गुरु स्यात् हे अलिकुन्तले षष्ठमष्टमं च गुरु हे प्रिये द्वादशमथ चतुर्दशं गुरु हे गभीरनाभिह्रदे पञ्चद-शेन सहितमन्तिकं गुरु स्यात् । हे कान्ते यत्र गिरीन्द्रै-रष्टभिः फणिभृत्कुलैर्नवभिश्च यतिः स्यात्सा पृथ्वीनामकं वृत्तं भवति । अलिवद्भ्रमरवच्छ्यामाः कुन्तला अलका यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ॥४१॥ पृथ्वी । च० अ० १७, ग० ज, स, ज, स, य; ल, ग; यतिः ८, ९ ॥

हे श्यामजूडेवाली ? कान्ते ? यदि द्वितीय छठा और अ-ष्टम तथा बारहवां और चौदहवां यह अक्षर गुरु हो, तदनन्तर पन्द्रहवां और अन्त्यम यह अक्षरभी गुरु हो, हे गम्भीरनाभि-वति ? प्रिये ? यदि आठ और नव अक्षरके ऊपर विराम हों, हे कमानकी समान भ्रुकुटिवालि ? उसको पृथ्वीछन्द कहतेहैं ॥४१॥

मन्दाक्रान्तावृत्तम् ।

चत्वारः प्राक् सुतनु गुरवो द्वादशैकादशौ चे-
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ ॥
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते विरामो
मन्दाक्रान्तां प्रवरकवयस्तन्वि तां संगिरन्ते ॥४२॥

मन्दाक्रान्तालक्षणमाह । चत्वार इति ॥ हे तन्वि प्रवरक-वयो यत्र प्राक् चत्वारो वर्णा गुरवः स्युः हे कुमुदामो-दिनि चेद्वर्णौ द्वादशैकादशौ गुरू स्तः हे मुग्धे द्वादशा-न्त्यौ द्वादशस्यान्त्यस्थितौ त्रयोदशचतुर्दशौ गुरू स्यातां

अन्त्यौ षोडशसप्तदशौ तद्वद्गुरू युगरसहयैर्विरामः एतादृशीं तां मन्दाक्रान्तां संगिरन्ते । कुमुदवदामोदः सुगन्धिर्यस्याः सा । तथोक्तं रत्नाकरे । मन्दाक्रान्तां जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् ॥ ४२ ॥ मन्दाक्रान्ता । च० अ० १७, ग० म, भ, न, त, त; ग, ग; यतिः ४, ६, ७ ॥

हे हमारी प्यारी ? जिसकी आदिके तीन अक्षर गुरु हों, तत्पश्चात्–छटा और आठमा यह अक्षर दीर्घ हों, तदनु–बारह तेरह और चौदह तथा सोलह और सत्रवहां यह अक्षरभी गुरु हों, और हे मयङ्कमुखि ? बारह तथा सात अक्षरके ऊपर विश्राम हो, काव्यरसिक जन उसको शार्दूलविक्रीडित छन्द कहतेहैं ॥

शार्दूलविक्रीडितं छन्दः ।

आद्याश्चेद्गुरवस्त्रयः प्रियतमे षष्ठस्तथा चाष्टमो
नन्वेकादशतस्त्रयस्तदनु चेदष्टादशाद्यौ ततः ॥
मार्तण्डैर्मुनिभिश्च यत्र विरतिः पूर्णेन्दुबिम्बानने
तद्वृत्तं प्रवदन्ति काव्यरसिकाः शार्दूलविक्रीडितम् ४३

एकोनविंशतिजातौ शार्दूलविक्रीडितमाह ॥ आद्या इति ॥ हे पूर्णेन्दुबिम्बानने काव्यरसिकास्तद्वृत्तं शार्दूलविक्रीडितं वदन्ति । यत्राद्यास्त्रयो गुरवः षष्ठस्तथाऽष्टमः गुरुः । ननु एकादशतस्त्रयः द्वादशत्रयोदशचतुर्दशा गुरवः ततश्चेदष्टादशस्याद्यौ षोडशसप्तदशौ गुरू स्याताम् । यत्र मार्तण्डैर्मुनिभिर्द्वादशसप्तभिर्विरतिः हे प्रियतमे तदेतच्छार्दूलविक्रीडितम् । पूर्णश्चासाविन्दुस्तस्य बिम्बवदाननं यस्याः सा अतिशयेन प्रिया प्रियतमा तस्याः संबुद्धौ । तदुक्तं रत्नाकरे । सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ॥ ४३ ॥ शार्दूलविक्रीडितम् । च० अ० १९, ग० म, स, ज, स, त, त; ग, यतिः १२, ७ ॥

स्रग्धरा वृत्तम्।

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते षोडशान्त्यौ तथान्त्यौ रम्भास्तम्भोरुकान्ते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो बाले वन्द्यैः कवीन्द्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा॥ ४४॥

इति श्रीकविकालिदासकृतः श्रुतबोधनामकश्छन्दोग्रन्थः समाप्तः

एकविंशत्यक्षरजातौ स्रग्धरालक्षणमाह॥ चत्वार इति॥ हे सुदति वन्द्यैः पूज्यैः कवीन्द्रैः प्रसिद्धा इयं स्रग्धरा गदिता। यत्र प्रथमं चत्वारो वर्णा अलघवो गुरवः सन्ति षष्ठकः सप्तमोऽपि तद्वद्गुरुः। षोडशाद्यौ चतुर्दशपञ्चदशौ तथान्त्यौ सप्तदशाष्टादशौ गुरू स्याताम्। मुनिमुनिमुनिभिर्विरामः। हे रम्भास्तम्भोरुकान्ते हे बाले इयं स्रग्धरा प्रसिद्धा मृगस्य मदेन मुदिता सा। रम्भायाः स्तम्भवदूर्वोः कान्तिर्यस्याः सा। सुशोभना दन्ता यस्याः सा तत्संबुद्धौ। तदुक्तं रत्नाकरे। म्रौ भ्नौ यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्॥ ४४॥ इति श्रीश्रुतबोधनामकस्य छन्दोग्रन्थस्य व्याख्या समाप्ता॥ स्रग्धरा। च० अ० २१, ग० म, र, भ, न, य, य, य; यतिः ७, ७, ७॥

हे मृगमदसौरभवासिनि ! जिसकी आदिमे चार अक्षर गुरु हों, हे रम्भोरु ! तथा छटा औ सातवां चौदाहवां तथा पन्द्रहवां, सत्तरह और अठारहवां, और वीस तथा इक्कीसवां यह अ-

क्षर गुरु हों हे बाले ? सात २ वर्णोंकेऊपर विश्राम हो, हे सुतनु ? सुप्रसिद्ध उस छन्दका वन्दनीय कवि गुरुओंने स्रग्धरा नाम कहाहै ॥ ४३ ॥

इति श्रीसर्वविद्याविशारद श्रीपण्डितवर्य्यज्वालानाथसूरिसूनुव्रजरत्न-
भट्टाचार्य्यमुरादावादनिवासिप्रणीत हिन्दीभाषानुवाद
सम्पूर्ण ॥ शुभं भवतु मंगलमस्तु श्रीरस्तु

११ जन्वरी १८९५ शुक्रवार. १५ पौष १९५१

गणनामदेवताफलानि ॥

मो भूमिः श्रियमातनोति य जलं वृद्धिं र चाग्निर्मृतिं
सो वायुः परदेशदूरगमनं त व्योमशून्यं फलम् ॥
जः सूर्यो रुजमाददाति विपुलं भेन्दुर्यशो निर्मलं
नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः॥१॥

अथ गणसंख्यानामरूपदेवताफलादिज्ञापकं यन्त्रम् ॥

	गणनाम	रूपम्	देवता	फलम्	मित्रादि	फलम्
१	मगणः	SSS	मही	लक्ष्मीः	मित्रम्	शुभम्
२	नगणः	।।।	स्वर्गः	बुद्धिः	मित्रम्	शुभम्
३	भगणः	S।।	शशी	यशः	दासः	शुभम्
४	यगणः	।SS	जलम्	आयुः	दासः	शुभम्
५	जगणः	।S।	रविः	रुजम्	उदासः	अशुभम्
६	रगणः	S।S	अग्निः	दाहः	शत्रुः	अशुभम्
७	सगणः	।।S	वायुः	विदेशः	शत्रुः	अशुभम्
८	तगणः	SS।	नभः	शून्यम्	उदासः	अशुभम्

श्रीः

गणोके नाम देवता और फल.

श्लोक.

मो भूमिः श्रियमातनोति य जलं वृद्धिं र चाग्निर्मृतिं
सो वायुः परदेशदूरगमनं त व्योमशून्यं फलम् ॥
जः सूर्य्यो रुजमाददाति विपुलं भेन्दुर्यशो निर्मलम्
नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः ॥१॥

अनुवाद—मगणका भूमि देवता है, वोह लक्ष्मीका विस्तार करताहै; यगणका जल देवता है, वोह आयुदेता है, रगणका देवता अग्नि है, वोह दाह देता है; सगणका वायु देवता है, वोह परदेश वा दूरगमन करता है; तगणका आकाश देवता और शून्य फल है; जगणका सूर्य देवता है, वोह रोग देता है; भगणका चन्द्रमा देवता है, वोह निर्मल यश देता है; नगणका स्वर्ग देवता है, वोह सुख देता है; इस उक्तप्रकारसे पण्डित महोदय गणोका फल वर्णन करते हैं ॥ १ ॥

गणदेवतारूपादिज्ञापक यन्त्र.

गणना	नाम	रूप	देवता	फल	मित्रादि	फल
१	मगण	SSS	पृथ्वी	लक्ष्मी	मित्र	शुभ
२	यगण	ISS	जल	आयु	दास	शुभ
३	रगण	SIS	अग्नि	दाह	शत्रु	अशुभ
४	सगण	IIS	पवन	परदेश	शत्रु	अशुभ
५	तगण	SSI	आकाश	शून्य	उदास	सम
६	जगण	ISI	सूर्य	रोग	उदास	सम
७	भगण	SII	चंद्र	यश	दास	शुभ
८	नगण	III	स्वर्ग	सुख	मित्र	अशुभ

गणदेवतारूपदेशफलादिज्ञापक यन्त्र.

गणना	नाम	रूप	देवता	नक्षत्र	राशी	जन्मवार	जाति	मास	पक्ष	तिथि	वर्ण	देश	पुरी	पर्वत	फल	मित्रादि	फल	स्त्री	मन्त्र
१	मगण	ऽऽऽ	पृथ्वी	रोहिणी	वृष	शनि	शूद्र	पौष	शुक्ल	१०	मिश्रित	जालंधर	स्वर्ग	शैलाधि	लक्ष्मी	मित्र	शुभ	कमला	ॐ मं-मगणायनमः ॥ १ ॥
२	यगण	।ऽऽ	जल	ज्येष्ठा	वृश्चिक	चन्द्र	वैश्य	आषाढ	शुक्ल	१२	श्याम	कोशिल	विपुला	वंगकैवर्त	आयु	दास	शुभ	ब्रह्माणी	ॐ यं-यगणायनमः ॥ २ ॥
३	रगण	ऽ।ऽ	अग्नि	अश्विनी	मेष	रवि	क्षत्री	पौष	शुक्ल	९	रक्त	महेंद्र	मकरन्द	मलयाचल	दाह	शत्रु	अशुभ	स्वधा	ॐ रं-रगणायनमः ॥ ३ ॥
४	सगण	।।ऽ	पवन	पूर्वाभाद्रपदा	कुम्भ	बुध	वैश्य	कार्तिक	शुक्ल	६	नील	विडम्बर	ककेर	सेतुबन्ध	परदेश	शत्रु	अशुभ	गारुडी	ॐ सं-सगणायनमः ॥ ४ ॥
५	तगण	ऽऽ।	आकाश	रेवती	मीन	भौम	शूद्र	चैत्र	शुक्ल	३	धूम्र	कुन्तल	चम्पावती	कर्णगिरि	शून्य	उदासीन	समान	शून्या	ॐ तं-तगणायनमः ॥ ५ ॥
६	जगण	।ऽ।	सूर्य	श्रवण	मकर	शुक्र	ब्राह्मण	मार्गशिर	शुक्ल	५	रक्त	प्रवल	चित्रपुरी	उदयाचल	रोग	उदासीन	समान	आतपा	ॐ जं-जगणायनमः ॥ ६ ॥
७	भगण	ऽ।।	चन्द्रमा	रेवती	मीन	गुरु	देवता	आश्विन	शुक्ल	१३	श्वेत	शुक्ल	प्रभावतीपुरी	मिमारगिरि	यश	दास	शुभ	शुक्ला	ॐ भं-भगणायनमः ॥ ७ ॥
८	नगण	।।।	स्वर्ग	अनुराधा	वृश्चिक	बुध	क्षत्री	ज्येष्ठ	शुक्ल	१५	गौर	क्रौंच	काञ्चीपुरी	चन्द्रगिरि	सुख	मित्र	शुभ	सञ्जीविनी	ॐ नं-नगणायनमः ॥ ८ ॥

ता०-११।१।१८९७.
रुहेलखण्ड

ब्रजरत्नभट्टाचार्य्य,
मुरादाबाद,
मोहल्ला-पट्टवारगञ्ज.

THE

YASODHARACHARITA

OF

VA[illegible]RAJASURI

EDITED AND PUBLISHED

BY

T. A. GOPINATHA RAO, M. A.

Superintendent of Archaeology, Trivandrum

PRINTED AT THE SRI KRISHNA VILASA PRESS,

TANJORE

1912.

PRICE 8 ANNAS

THE

YASODHARACHARITA

OF

VADIRAJASURI

EDITED AND PUBLISHED

BY

T. A. GOPINATHA RAO, M. A.

Superintendent of Archaeology, Trivandrum.

PRINTED AT THE SRI KRISHNA VILASA PRESS.

TANJORE

1912.

PRICE 8 ANNAS.

Introduction.

Five major and five minor epics are the pride of Tamil literature. The major epics comprise of Silappadigaram, Manimekhalai, Jivakachintamani, Valayapati and Kundalakesi; of these, the first three have been edited in his characteristically careful manner by that great Tamil scholar Mahamahopadhyaya Svaminatha Ayyar of the presidency College. Of the minor *Kavyas*, Chulamani, Yasodhara-kavyam, Udayanan-kathai, Nagakumara-kavyam and Nilakesi, the first two have appeared in print[1]. All these epics are non-Brahmanical and most of them are the productions of eminent Jaina authors. Curiously enough some of the Tamil *Kavyas* have more or less close Sanskrit renderings made also by Jaina authors. For instance, the story of the *pauranic* personage, Jivandhara, the hero of the Tamil Jivakachintamani, is repeated in the Uttara-purana of Gunabhadracharya[2], in the Gadyachintamani and Kshattrachudamani of Vadibhasimha and in the Jivandhara-champu, of Harichandra. Similarly also Yasodhara-kavyam has its analogue in sanskrit and they are both so strik-

---

1. Chulamani has been edited by Mr. C. W. Damodaram Pillai, B A. B.L. while Yasodhara-kavyam has been edited by Pandit T. Venkatarama Iyengar.

2. See the Introduction to Jivandhara-charitra, Sarasvati-vilasa Series No. II by Mr. T. S. Kuppusvami Sastri.

ingly alike in composition and diction that there is every probability, as Mr. Kuppusvami Sastri ventures to think, that they were written by one and the same author[3]. We owe the publication of the Sanskrit Gadyachintamani and other Jaina *Kavyas* to the disinterested labours of the indomitable but very unostentatious scholar, Mr. Kuppusvami Sastri of Tanjore. With every possible help received from the same learned scholar, I am now enabled to publish the Sanskrit Yasodhara-kavya. In editing it the following three palm-leaf manuscripts in grantha character have been consulted viz, (A) of Vajrabahu-Mudaliyar of Tanjore, (B) of Jayarao Nainar of Nerkunam. and (C) of Selvarasu Sastriyar of Venkunam; of these, the text ofthe manuscript (c) being the most reliable, has generally been adopted.

It is interesting to compare the relative antiquity of the Tamil *Kavyas* with their analogues in Sanskrit and it will not be out of place to discuss the ages of some of these works. In the long lists of the *acharyas* of the Dramida-sangha given in several inscriptions, the following names occur, Chintamani-muni, the author of Chintamani, who is praised in the following verse

धर्मार्थकामपरिनिर्वृतिचारुचिन्त-
श्चिन्तामणिः प्रतिनिकेतमकारि येन ।
स स्तूयते सरससौख्यभुजा सुजात-
श्चिन्तामणिर्मुनिवृषा न कथञ्जनेन ॥

---

3. Sendamil, Vol. IX. pp 217, 265 and 313.

4. Ep. Ind. Vol, III, pp 190—91.

The work Chintamani was, as described above, meant to be used in every house as it contained fine thoughts on the four Purusharthas virtue, wealth, pleasure and Salvation (*dharma*, *artha*, *kama* and *moksha*). That it refers only to a *kavya* is plainly stated in another inscription thus:—

कृत्वा चिन्तामणिं काव्यमभीष्टार्थसमर्पनम् ।
चिन्तामणिरभून्नाम्ना भव्यचिन्तामणिर्गुरुः ॥

It looks as if this *kavya* is no other than the Tamil epic, written in 2700 verses of four lines each and which was extremely popular with all people; and it is stated as one of the reasons for its composition, in the Periyapurana, that the Saivas were *wasting their time in reading such false stories as the Chintamani*[5], evidently showing its vast popularity. In an introduction to the commentary on the Jivakachintamani, it is stated that *Tiruttagu-muni*,—a mere honorary appellation, not a proper name of the person,—was its author and that he was born in the Chola family and was held in great respect by the Ganga king *Poyyamoli*, a literal rendering in Tamil of the name *Satyavakya*.[6] Since this *acharya* is placed very early in the lists and also very near in point of time to *Simhanandi* the *acharya* who is said to have

---

5. '*Kundaman--purattu-thiruttu--chchintamani*' Chintamani, the (poem) of the rough false and theivish Jainas. Tiruthondapurana-varalaru, V. II.

6. See to 918 of Svaminatha Ayyar's Edition.

helped in establishing the Ganga kingdom[7], and lastly since he is said to have been held in veneration by a Ganga king Satyavakya, it will not be far wrong to attribute the composition of the Tamil Jivakachintamani to the latter half of the 9th century A. D., about the reign of Satyavakya-Kongunivarma Permanadi Rajamalla, (A. D. 870—71). Shortly after this, in the reign of the Rashtrakuta king Krishna, *alias* Akalavarsha, son of Amoghavarsha, about the third quarter of the ninth century, Gunabhadracharya finished his Uttara-purana[8]. Gadya-chintamani, as opposed to the padya-Chintamani of the Tamil language, was written by Vadibhasimha, whose proper name is Ajitasena-bhattaraka. In an inscription belonging to the Nagar Taluka of the Shimoga District in the Mysore Province he is called Sabdachaturmukhar, Tarkika-chakravartigal and Vadibhasimhar. Ajitasena was the *guru* of the Hoysala king Ereyanga and was perhaps by him styled the *Jagad-guru*[9]. The latter lived in the last decade of the 11th century A. D. Hence Ajitasena-Vadibhasimha must have lived in the last quarter of the 11th century.

The next name we meet with in the lists is Srivarddhadeva, the author of Chulamani. He is described in the Mallishena epitaph thus: —[10]

चूळामणिः कवीनां चूळामणिनामसेव्यकाव्यकविः ।
श्रीवर्धदेव एव हि कृतपुण्यः कीर्त्तिमाहर्तुम् ॥

---

7. Compare No. 35, Nagar Tk. Shimoga Dt., 37 of do, &c,
8, See note 2 above,
9. No. 17 Belur Tk. Hassen Dt.
10, Ep, Ind Vol. III p 191

The spelling of the name of the work with a *la* instead of *da* as would be required in Sanskrit is worth nothing. I am inclined to believe that it is an allusion to the Tamil work of that name. In the introductory verse of the Tamil Chulamani it is stated that its author was 'the unconquerable in speech', the disciple of Dharma-tirtha and that he was patronised by the Karvetti (Kaduvetti ?) king[11]. We learn practically nothing from these about the author of Chulamani. Since the name of Srivardhadeva occurs immediately after Chintamani-muni and long before Vadiraja Ajitasena etc., it is likely that he lived in the 10th century.

The Name of the author of the Tamil Yasodhara-kavyam is unknown. But that of the Sanskrit work is clearly stated to be Vadiraja. His name proper is Kanakasena, who, in an inscription[12], is said to have been the *guru* of the Ganga king Raya Rachamalla and in another of Jayasimha-chakravarti[13], and that he had for his disciples Odeyadeva *alias* Srivijaya-deva, Pushpasena etc. [14]. He held the *Birudas*, 'Shat-tarka-Shanmukha', and 'Jagadekamalla-vadi'.[15] Vadiraja is described as gaining frequent victories over his opponants and receiving *Jaya-patras* from the king

---

11. See, verse 1 Introduction,
12, No, 35, Nagar Tk, Shimoga Dt.
13, No, 17 Belur Tk, Hassan Dt.
14, No. 35, Nagar T k Shimoga Dt.
15. (a) Ibid,

Jayasimha-chakravarti[16]. His disciple Srivijaya was the *guru* of Butuga Permmadi[17], who, we know, reigned about 950 A. D. Taking all these facts into consideration, it is certain that Kanakasena Vadiraja lived in the second half of the 10th century A. D, If as surmised by Mr. Kuppusvami Sastri, the author of the Tamil poem happens to be also Vadiraja, its composition must be attributed to the last quarter of the 10th Century.

It is interesting to note that a Lakulisvara Pandita is described in an inscription in the following terms, *abhayachandra kalanalam Vadibha-sarabha-simham*', 'Vadiraja-mukha-mudra', '...*vadi Digambaradhuma ketu*', *Vadi-Rudraguna*' etc; the date of this inscription is S'957[18]. Evidently, he must have held philosophical wrangles with the Jaina *acharyas*, Vadiraja, Vadibhasimha, Abhayachandra and others. From this inscription also the age of Vadiraja and other later *acharyas* is obtained which corroborates those obtained already above.

It is evident from the above paragraphs that the Dramida-sangha was, true to its name, composing remarkable poems in Tamil and also rendering them in Sanskrit for the benefit of those that did not understand the former language.

T, A. GOPINATHA RAO.

16, No, 37 Nagar Tk, Shimoga Dt.

17, No. 17 Belur Tk. Shimoga Dt,

18. No, 126. Shikaripur Tk. Shimoga Dt.

वादिराजमुनेः पौर्वकालिकाः प्रबन्धारः प्रबन्धाश्च ॥

"कति कवयः कति कृतयः
कति लुप्ताः कति चरन्ति कति शिथिलाः ॥"

१. उमास्वस्याचार्यः तत्त्वार्थसूत्रशास्त्रम् ।

"श्रीमानुमास्वस्तिरयं यतीशस्तत्त्वार्थसूत्रं प्रकटीचकार ।
यन्मुक्तिमार्गाचरणोद्यतानां पाथेयमर्घ्यं भवति प्रजानाम् ॥
तस्यैव शिष्योऽजनि गृध्रपिञ्छो द्वितीयसंज्ञस्य बलाकपिञ्छः ।
यत्सूक्तिरत्नानि भवन्ति लोके मुक्त्यङ्गनामोहनमण्डनानि ॥"

२. गृध्रपिञ्छः

"अतुच्छगुणसंपातं गृध्रपिञ्छं नतोऽस्म्यहम् ।
पक्षीकुर्वन्ति यं भव्या निर्वाणायोत्पतिष्णवः ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

३. समन्तभद्रः { १. देवागमस्तोत्रम् । २. रत्नकरण्डकम् । ३ गन्धहस्तिमहाभाष्यम् ।

"स्वामिनश्चरितं तस्य कस्य नो विस्मयावहम् ।
देवागमेन सर्वज्ञो येनाद्यापि प्रदर्श्यते ॥
अचिन्त्यमहिमा देवः सोऽभिवन्द्यो हितैषिणा ।
शब्दाश्च येन सिध्यन्ति साधुत्वं प्रतिलम्भिताः ॥
त्यागी स एव योगीन्द्रो येनाक्षय्यसुखावहः ।
अर्थिने भव्यसार्थाय दत्तो रत्नकरण्डकः ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

४. सिंहनन्दी.

"योऽसौ घातिमलद्विषद्दलशिलास्तम्भावलीखण्डन-
ध्यानासिः पटुरर्हतो भगवतः सोऽस्य प्रसादीकृतः ।

छात्रत्यापि स सिंहनन्दिमुनिना नो चेत्कथं वा शिला-
स्तम्भो राज्यरमागमाध्वपरिघस्तेनासिखण्डो घनः ॥"

इति मल्लिषेणप्रशस्तौ ।

५. वक्रग्रीवः.

"वक्रग्रीवमहामुनेर्दशशतग्रीवोऽप्यहीन्द्रो यथा-
जातं स्तोतुमलं वचोबलमसौ किं भग्नवाग्मिव्रजम् ।
योऽसौ शासनदेवताबहुमतो ह्रीवक्रवादिग्रह-
ग्रीवोऽस्मिन्नथशब्दवाच्यमवदन्मासान्समासेन षट् ॥"

इति मल्लिषेणप्रशस्तौ ।

६. वज्रनन्दी. नवस्तोत्रम् ।

"न वः स्तोत्रं तत्र प्रसजति कवीन्द्राः कथमपि
प्रणामं वज्रादौ रचयत परं नन्दिनि मुनौ ।
नवस्तोत्रं येन व्यरचि सकलार्हत्प्रवचन-
प्रपञ्चान्तर्भावप्रवणवरसंदर्भसुभगम् ॥"

इति मल्लिषेणप्रशस्तौ ।

७. पात्रकेसरी. त्रिलक्षणकदर्थनम् ।

"महिमा स पात्रकेसरिगुरोः परं भवति यस्य भक्त्यासीत् ।
पद्मावती सहाया त्रिलक्षणकदर्थनं कर्तुम् ॥"

इति मल्लिषेणप्रशस्तौ ।

८. सुमतिदेवः. सुमतिसप्तकम् ।

"सुमतिदेवममुं स्तुत येन वः सुमतिसप्तकमाप्ततया कृतम् ।
परिहृतापदतत्त्वपदार्थिनां सुमतिकोटिविवर्ति भवार्तिहृत् ॥"

इति मल्लिषेणप्रशस्तौ ।

९. कुमारसेनः.

"उदेत्य सम्यग्दिशि दक्षिणस्यां कुमारसेनो मुनिरस्तमापत् ।
तत्रैव चित्रं जगदेकभानोस्तिष्ठत्यसौ तस्य तथाप्रकाशः ॥"

इति मल्लिषेणप्रशस्तौ ।

१०. चिन्तामण्याचार्यः. चिन्तामणिः ।

"धर्मार्थकामपरिनिर्वृतिचारुचिन्त-
श्चिन्तामणिः प्रतिनिकेतमकारि येन ।
स स्तूयते सरससौख्यभुजा सुजात-
श्चिन्तामणिर्मुनिवृषा न कथं जनेन ॥"

इति मल्लिषेणप्रशस्तौ ।

११. श्रीवर्धदेवः. चूडामणिः ।

"चूडामणिः कवीनां चूडामणिनामसेव्यकाव्यकविः ।
श्रीवर्धदेव एव हि कृतपुण्यः कीर्तिमाहर्तुम् ॥
स एवमुपश्लोकितो दण्डिना—
जह्नोः कन्यां जटाग्रेण बभार परमेश्वरः ।
श्रीवर्धदेव संधत्से जिह्वाग्रेण सरस्वतीम् ॥"

इति मल्लिषेणप्रशस्तौ ।

१२. महेश्वरः.

"पुष्पास्त्रस्य जयो गणस्य भरणं भूभृच्छिखाघट्टनं
पद्भ्यामस्तु महेश्वरस्तदपि न प्राप्तुं तुलामीश्वरः ।
यस्याखण्डकलावतोऽष्टविलसद्दिक्पालमौलिस्खल-
त्कीर्तिः स्वःसरितो महेश्वर इह स्तुत्यः स कैः स्यान्मुनिः ॥
यः सप्ततिमहावादाञ्जिगायान्यानथामितान् ।
ब्रह्मरक्षोऽर्चितः सोऽर्च्यो महेश्वरमुनीश्वरः ॥"

इति मल्लिषेणप्रशस्तौ ।

१३. अकलङ्कदेवः { १. अष्टशती नाम देवागमस्तोत्रभाष्यम् ।
२. राजवार्तिकम् ।

"तर्कभूवल्लभो देवः स जयत्यकलङ्कधीः ।
जगद्द्रव्यमुषो येन दण्डिताः शाक्यदस्यवः ॥"

इति पार्श्वनाथकाव्ये वादिराजसूरिः ।

"भट्टाकलङ्कश्रीपालपात्रकेसरिणां गुणाः ।

विदुषां हृदयारूढा हारायन्तेऽतिनिर्मलाः ॥"

इत्यादिपुराणे जिनसेनाचार्यः ।

"तारा येन विनिर्जिता घटकुटीगूढावतारा समं
बौद्धैर्यो धृतपीठपीडितकुदृग्देवार्थसेवाञ्जलिः ।
प्रायश्चित्तमिवाङ्घ्रिवारिजरजःस्नानं च यस्याचर-
द्दोषाणां सुगतः स कस्य विषयो देवाकलङ्कः कृती ॥

यस्येदमात्मनोऽनन्यसामान्यनिरवद्यविद्याविभवोपवर्णनमाकर्ण्यते—

राजन्साहसतुङ्ग सन्ति बहवः श्वेतातपत्रा नृपाः
किंतु त्वत्सदृशा रणे विजयिनस्त्यागोन्नता दुर्लभाः ।
तद्वत्सन्ति बुधा न सन्ति कवयो वादीश्वरा वाग्मिनो
नानाशास्त्रविचारचातुरधियः काले कलौ मद्विधाः ॥
राजन्सर्वारिदर्पप्रविदलनपटुस्त्वं यथात्र प्रसिद्ध-
स्तद्वत्ख्यातोऽहमस्यां भुवि निखिलमदोत्पाटनः पण्डितानाम् ।
नो चेदेषोऽहमेते तव सदसि सदा सन्ति सन्तो महान्तो
वक्तुं यस्यास्ति शक्तिः स वदतु विदिताशेषशास्त्रो यदि स्यात् ॥
नाहंकारवशीकृतेन मनसा न द्वेषिणा केवलं
नैरात्म्यं प्रतिपद्य नश्यति जने कारुण्यबुध्द्या मया ।
राज्ञः श्रीहिमशीतलस्य सदसि प्रायो विदग्धात्मनो
बौद्धौघान्सकलान्विजित्य सुगतः पादेन विस्फोटितः ॥

इति मल्लिषेणप्रशस्तौ ।

१४. वादिसिंहः

"कवित्वस्य परा सीमा वाग्मित्वस्य परं पदम् ।
गमकत्वस्य पर्यन्तो वादिसिंहोऽर्च्यते न कैः ॥"

इत्यादिपुराणारम्भे ।

"स्याद्वादगिरिमाश्रित्य वादिसिंहस्य गर्जिते ।
दिङ्नागस्य मदध्वंसे कीर्तिभङ्गो न दुर्घटः ॥"

इति पार्श्वनाथकाव्ये वादिराजसूरिः ।

१५. प्रभाचन्द्रः. { १. चन्द्रोदयम् ।
२. प्रमेयकमलमार्तण्डम् ।
३. राजमार्तण्डम् । }

"चन्द्रांशुशुभ्रयशसं प्रभाचन्द्रकविं स्तुवे ।
कृत्वा चन्द्रोदयं येन शश्वदाह्लादितं जगत् ॥
चन्द्रोदयकृतस्तस्य यशस्केन न शस्यते ।
यमाकल्पमनाम्लानं सतां शिखरतां गतम् ॥"

इत्यादिपुराणारम्भे जिनसेनाचार्यः ।

१६. सन्मतिः. सन्मतिविवरणम् ।

१७. वीरसेनाचार्यः. { सिद्धभूपद्धतिः ।
विजयधवलसिद्धान्तटीका । }

"श्रीवीरसेन इत्यात्तभट्टारकपृथुप्रथः ।
स नः पुनातु पूतात्मा कविबृन्दारको मुनिः ॥
लोकवित्त्वं कवित्वं च स्थितं भट्टारके द्वयम् ।
वाग्मितावाग्मिता यस्य वाचा वाचस्पतेरपि ॥
सिद्धान्तोपनिबन्धानां विधातुर्मद्गुरोश्चिरम् ।
मन्मनस्सरसि स्थेयान्मृदुपादकुशेशयम् ॥"

इत्यादिपुराणारम्भे जिनसेनाचार्यः ।

१८. जिनसेनाचार्यः. { १. हरिवंशपुराणम् ।
२. पार्श्वाभ्युदयकाव्यम् ।
३. आदिपुराणम् । }

"शाकेष्वब्दशतेषु सप्तसु दिशं पञ्चोत्तरेषूत्तरां
पातीन्द्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणाम् ।
पूर्वां श्रीमदवन्तिभूभृति नृपे वत्साधिराजे परां
सौराणामधिमण्डलं जययुते वीरे वराहेऽवति ॥"

इति हरिवंशपुराणे जिनसेनाचार्यः ।

"इति विरचितमेतत्काव्यमावेष्ट्य मेघं
बहुगुणमपदोषं कालिदासस्य काव्यम् ।

मलिनितपरकाव्यं तिष्ठतादाशशाङ्कं
भुवनमवतु देवः सर्वदामोघवर्षः ॥
श्रीवीरसेनमुनिपादपयोजभृङ्गः
श्रीमानभूद्विनयसेनमुनिर्गरीयान् ।
तच्चोदितेन जिनसेनमुनीश्वरेण
काव्यं व्यधायि परिवेष्टितमेघदूतम् ॥"

इति पार्श्वाभ्युदयकाव्ये जिनसेनाचार्यः ।

"जिनसेनमुनेस्तस्य माहात्म्यं केन कथ्यते ।
शलाकापुरुषाः सर्वे यद्वचोवशवर्तिनः ॥"

इति पार्श्वनाथकाव्ये वादिराजसूरिः ।

१९. अमोघवर्षः. प्रश्नोत्तररत्नमालिका ।

"विवेकात्त्यक्तराज्येन राज्ञेयं रत्नमालिका ।
रचितामोघवर्षेण सुधियां सदलंकृतिः ॥"

२०. गुणभद्राचार्यः. { १. उत्तरपुराणम् । २. आत्मानुशासनम् ॥

"शकनृपकालाभ्यन्तरविंशत्यधिकाष्टशतमिताब्दान्ते ।
मङ्गलमहार्थकारिणि पिङ्गलनामनि समस्तजनसुखदे ॥
श्रीपञ्चम्यां बुधार्द्रायुजि दिवसकरे मन्त्रिवारे बुधांशे
पूर्वायां सिंहलग्ने धनुषि धरणिजे वृश्चिकार्कौ तुलायाम् ।
सर्पे शुक्रे कुलीरे गवि च सुरगुरौ निष्ठितं भव्यवर्यैः
प्राप्तेज्यं सर्वसारं जगति विजयते पुण्यमेतत्पुराणम् ॥"

इत्युत्तरपुराणावसाने ।

"जिनसेनाचार्यपादस्मरणाधीनचेतसाम् ।
गुणभद्रभदन्तानां कृतिरात्मानुशासनम् ॥"

२१. अनन्तकीर्तिः. जीवसिद्धिः ।

"आत्मनैवाद्वितीयेन जीवसिद्धिं निबध्नता ।

अनन्तकीर्तिना मुक्तिमार्गो × × वलक्ष्यते ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

२२. पाल्यकीर्तिः,

"कुतस्त्या तस्य सा शक्तिः पाल्यकीर्तेर्महौजसः ।
श्रीपदश्रवणं यस्य शाब्दिकान्कुरुते जनान् ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

२३. धनञ्जयः. { १. द्विसंधानकाव्यम् । २. नाममाला ।

"प्रमाणमकलङ्कस्य पूज्यपादस्य लक्षणम् ।
द्विसंधानकवेः काव्यं रत्नत्रयमपश्चिमम् ॥ २०२ ॥
कवेर्धनंजयस्येयं सत्कवीनां शिरोमणेः ।
प्रमाणं नाममालेति श्लोकानां च शतद्वयम्" ॥ २०३ ॥

इति नाममालायाम् ।

"द्विसंधाने निपुणतां सतां चक्रे धनंजयः ।
यया जातं फलं तस्य सतां चक्रे धनंजयः ॥"

इति बालभारतबालरामायणादिनाटकानां प्रणेता राजशेखरः । अयं राजशेखरो नवमशताब्द्या अवसाने दशमशताब्द्याः प्रारंभे चासीत् ।

(Vide page 177 ff Vol. XXXIV, 1905, Indian Antiquary.)

"अनेकभेदसंधानाः खनन्तो हृदये मुहुः ।
बाणा धनंजयोन्मुक्ताः कर्णस्येवाप्रियाः कथम् ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

२४. माणिक्यनन्दी. { १. परीक्षामुखम् । २. न्यायविद्यामृतम् ।

"अकलङ्कवचोम्भोधेरुद्दध्रे येन धीमताम् ।
न्यायविद्यामृतं तस्मै नमो माणिक्यनन्दिने ॥"

इति प्रमेयरत्नमालायां अनन्तवीर्यः ।

२५. अनन्तवीर्यः. प्रमेयरत्नमाला नाम परीक्षामुखस्य व्याख्या।

"वैनेयप्रियपुत्रस्य हीरपस्योपरोधतः ।
शान्तिषेणार्थमारब्धा परीक्षामुखपञ्जिका ॥
तस्योपरोधवशतो विशदोरुकीर्ते-
माणिक्यनन्दिकृतशास्त्रमगाधबोधम् ।
स्पष्टीकृतं कतिपयैर्वचनैरुदारै-
र्बालप्रबोधकरमेतदनन्तवीर्यैः ॥"

इति प्रमेयरत्नमालायाम् ।

"वन्देयानन्तवीर्याब्दं यद्वागमृतवृष्टिभिः ।
जगज्जिघत्सन्निर्वाणः शून्यवादहुताशनः ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

२६. विद्यानन्दः.
- १. अष्टसाहस्री ।
- २. आप्तपरीक्षा ।
- ३. आप्तमीमांसाविवरणम् ।
- ४. बुद्धेशभवनव्याख्यानम ।

"ऋजुसूत्रं स्फुरद्रत्नं विद्यानन्दस्य विस्मयः ।
शृण्वतामप्यलंकारं दीप्तिरङ्गेषु रङ्गति ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

२७. विशेषवादी.

"विशेषवादिगीर्गुम्भश्रवणाबद्धबुद्धयः ।
अक्लेशादधिगच्छन्ति विशेषाभ्युदयं बुधाः ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

२८. वीरनन्दी. चन्द्रप्रभचरितम् ।

"चन्द्रप्रभाभिसंबद्धा रसपुष्टा मनःप्रियम् ।
कुमुद्वतीव नो धत्ते भारती वीरनन्दिनः ॥"

इति पार्श्वनाथचरितकाव्ये वादिराजसूरिः ।

——— :o: ———

पददीपिका ।

प्रथमसर्गे ।

नयाः, नैगमादिनयाः । निर्वाणश्रियं मोक्षलक्ष्मीम् । "आनन्दो ज्ञानमैश्वर्यं वीर्यं परमसूक्ष्मता । एतदात्यन्तिकं यत्र स मोक्षो जिनशासने" ॥ संवेगो वैराग्यम् । शुभदृष्टिता, पञ्चविंशतिदोषरहितं सम्यक्त्वम्। काकुत्स्थचरितं रामचरितम् । वास्ये क्षेत्रे । क्षुद्रहिमवतोऽद्रेः पूर्वदक्षिणपश्चिमदिग्भेदभिन्नसमुद्रत्रयस्य च मध्ये भरतवर्षः । राजराजपुरं कुबेरनगरम् । परिधिः प्राकारः । परिवेषः परिधिः । "परिवेषस्तु परिधिरुपसूर्यकमण्डले" इत्यमरः । मिश्रो मिलितः । धनदावासाः धनिकानां गृहाणि । केतुभिः पताकाभिः । असमं विषमं उपमातीतं च । लावण्यं, लवणस्य कृत्यम् कान्तिविशेषश्च । पयोधराः, स्तनाः मेघाश्च । भूभृतः, राजानः पर्वताश्च । राज्यं प्रभुत्वम् । राष्ट्रं देशः । मारकव्याधिः, मारी नाम व्याधिः । इषे, आश्वयुजमासे । यात्रा, उत्सवः । मधुः, वसन्तः । परपुष्टैः कोकिलैः । शूल्यमांसैः शूलप्रोतमांसैः । त्रिदोषविनिर्मुक्तः रागद्वेषमोहविहीनः । त्रिदण्डविवर्जितः, मनोवाक्कायगुप्तिमान् । त्रिशल्यापविध्वंसी मिथ्यामायानिदानवर्जितः । अनागतभोगाकाङ्क्षणं निदानम् । त्रिगारवदूरगः ऋद्धिरससातवर्जितः। शीलं चरितम् । आचाराः पञ्चाचाराः । भिक्षा भ्रामरीवृत्तिः । क्षुल्लकौ परिमितवस्त्राच्छादनादिमन्तौ ब्रह्मचारिवेषौ । "क्षुल्लकः पामरे स्वल्पे" इत्यमरः । मातः, वासु । ज्ञातपूर्वापरान्तयोः, विदितपूर्वापरवृत्तान्तयोः । परीषहजयं द्वाविंशतिपरीषहाणां जयम् । "क्षुत्तृष्णा हिममुष्णं नग्नत्वं याचनारतिर्लाभः । दंशो मशकादीनामाक्रोशो व्याधिदुःखसंगमनम् । स्पर्शश्च तृणादीनामज्ञानमदर्शनं तथाप्रज्ञा । संस्कारपुरस्कारौ शय्या चर्या निषद्या स्त्री । द्वाविंशतिरप्येते परिषोढव्याः परीषहाः सततम् । संक्लेशमुक्तमनसा संक्लेशनिमित्तभीतेन" ॥ अजिगमिषितः प्राङ्गण-

भूमिः । निर्जितस्मरतत्प्रियम्, रतिमन्मथातिशायिसौन्दर्ययुक्तम् । दुरन्तं, अशुभोदर्कम् । श्लो. ५३—५४ "इति धर्म्यवचोऽप्यासीन्मर्मभित्तो-ग्रकर्मणः । पित्तज्वरवतः क्षीरं तिक्तमेव हि भासते" इति क्षत्र-चूडामणौ वादीभसिंहोऽपि ।

द्वितीयसर्गे ।

महोदयां, इति संगतः पाठः । चर्चा चन्दनादिना देहलेपः । कलापः संहतिः । क्रियाविधानात्, शाणोल्लीढनादिक्रियाणां लाक्षा-रसादिव्यापाराणां च निष्पादनात् । पूतक्रताव्या इन्द्राण्या । प्रतिपाद्य दत्त्वा । अङ्गेषु राज्याङ्गेषु । "स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोशो बलं सुहृत् । परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते । पौरश्रेणीभिः सहा-ष्टाङ्गमपि राज्यम्" । श्लो. २०. "सुप्तोऽपि चक्षुषा पश्यञ्जगत्तेजो-मयेन सः । दण्डेन दर्शयामास मार्गमुन्मार्गगामिनाम्" इति पार्श्व-नाथचरितेऽपि । मुख्यं मुखे भवम् । मण्डलं राज्यम् । प्रच्छदः आच्छादनवस्त्रम् । स्थासकः चन्दनादिना देहलेपः । वासगेहं समया, गर्भगृहस्य समीपे । रक्तकण्ठे हृदयहारिमधुरस्वरयुक्ते । "कण्ठो गले संनिधाने ध्वनौ मदनपादपे" इति विश्वः । पूतिर्दुष्टः । दुःसहः पूति-गन्धोऽस्य, दुःसहपूतिगन्धि । वयो नवमित्यादि— "रूपं कुलं यौवनमाभिजात्यं नतभ्रुवस्तन्न विचारयन्ति । क्वचिन्निकृष्टेऽपि रसान्नि-विष्टाः कन्दर्पदेवं परितर्पयन्ति" इत्यदसीयपार्श्वनाथचरितकाव्ये च । वरत्रं चर्मरज्जुः । इयं द्वितीया, मम राज्यलक्ष्म्याः सपत्नीभूतेयं अमृत-मतिः । "प्रौढानुरागेण बिभर्ति लक्ष्मीं नरो गुरूनप्यतिसंदधानः । सा वारनारीव नवप्रिया तं विमुञ्चती वाञ्छति कंचिदन्यम्" इत्यद-सीये पार्श्वनाथकाव्ये । सिद्धिकान्तां स्वात्मोपलब्धिरूपां कान्ताम् । प्रघणः, प्रघाणः । "प्रघाणप्रघणालिन्दा बहिर्द्वारप्रकोष्ठके" इत्यमरः । अनेन नवोत्पलेन; जारेणेति च ध्वन्यते । रन्ध्रेषु पत्रविवरेषु व्रणरन्ध्रेषु च । रसच्युता वारिकणान्प्रस्रावयता; दुष्टरक्तादीनि मुञ्चता च । उर्वरा सर्वसस्याढ्या भूमिः ।

तृतीयसर्गः ।

तावतिथः तावतां पूरणः । कन्तुरसिकस्य, कामासक्तस्य । "कन्तुः कामकुमूलयोः' इति हेमचन्द्रः । षट्तर्काः सांख्यसौगतन्यायवैशेषिकभाट्टप्राभाकराः । दृढवादैः स्वीकृतमतनिर्वाहकैः । गोष्ठ्यां सभायाम् । चतुरश्रैः समर्थैः । ग्रन्थसंगतनिबन्धनदक्षाः शास्त्राणां मनोहरेषु व्याख्यानेषु समर्थाः । वस्तुवर्णकवितांचतुरश्रैः, यथावद्वस्तुकथने उत्प्रेक्षाद्यलंकारवर्णने च समर्थैः । अङ्गेति संबोधने । ऋतंभरया सत्यंभरया । कुवलयोर्जितलक्ष्मीम्, नीलोत्पलस्य विकासयित्रीं शोभाम्; भूमण्डलस्योल्लासयित्रीं लक्ष्मीं च । देवीति मातरं प्रति संबुद्धिः । तिमिरेण अन्धकारेण; अघपङ्केन च इति ध्वन्यते । अविक्रमजासमृद्धम् । अद्य वा श्वो वा भविष्यतीत्यद्यश्वीनम् । चेतन एव प्राणिन्येव । दुर्गतिवधूः, नरकगतिरूपा स्त्री । पतन्तं पक्षिणम् । "पतत्पत्ररथाण्डजाः" इत्यमरः । अवयन् जानन् । अवाश्य भुक्त्वा । देहिनामित्यादि — "विनाशकाले विपरीतबुद्धिः" इति तात्पर्यार्थः । आर्तध्यायिनौ आर्तमनस्कौ । ऋतं दुःखमर्दनम् । तत्र भवमार्तम् । "अनिष्टसंगमे तस्य वियोगपरिचिन्तनम् । विप्रयोगे मनोज्ञस्य समागमविचिन्तनम् । रोगादिजनितायाश्च वेदनाया मुहुः स्मृतिः । निदानं चेति चत्वारो भेदाः पूर्वस्य कीर्तिताः । अनागतभोगाकाङ्क्षणं निदानम् । श्लो. ३५-३६. गर्भान्निस्सृतमण्डं रक्षन्तीं मयूरीं कश्चिद्व्याधो निहत्य तदण्डमादाय स्वगृहं गत्वा भार्याहस्ते तत्संरक्षणाय प्रादादिति समुदायार्थः । कलापः पिञ्छः । रात्रिजागरं श्वानम् । "यक्ष इन्द्रमृगः श्वालः कपिलो मण्डलः शुनः । जिह्वापानः पुरोगामी कृतज्ञो रात्रिजागरः" इति भोजनिघण्टुः । मृगदंशः श्वा । "कौलेयकः सारमेयः कुक्कुरो मृगदंशकः" । अधिशिप्रं शिप्रानदीतीरे । नृपकुब्जीम्, नृपस्य दासीं कुब्जिनीम् । धीवरैर्मत्स्यग्राहिभिः । अजनि सोऽजा—स भाद्रः, अजा अजस्त्री, अजनि जाता । जनंगमवाक्याम्

चण्डालवीथ्याम् । कोद्रवो धान्यविशेषः । बर्करः तरुणपशुः । कातरः मन्मथतापेनाकुलमास इत्यर्थः । रसवर्ती पाकशालाम् । जनिका जननी । वारिमुक्तं वारिणोऽर्थे बहिर्मुक्तम् । राजहंसम् राजहंसनामानम् । स्वं वसु जातम् । तद्विपाकिम [?], तस्य कर्मणः पाकेन निवृत्तम् । येयत इत्यादि— "अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते । त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः" इति शास्त्र-कारावचनमवितथं जातमित्यर्थः । गृध्न्या लोभेन । धारिणीं भूमिम् ।

चतुर्थसर्गे ।

तरलप्रवालतामिति संगतः पाठः । तरलप्रवालतां चलकिसलयवत्ताम् । प्रपद्य तानन्वरुदन्प्रवालयः, इति संगतः पाठः । वराङ्गनाङ्गाः, स्त्रीरूपाण्यङ्गान्येषाम् । व्यालमृगान् दुष्टमृगान् । व्यालमृगांश्च तस्करान्, इति संगतः पाठः । श्लो. १७. तत्, देहात्पृथगस्ति जीव इति तच्छब्दार्थः । "भस्त्रा चर्मप्रसेविका" इत्यमरः । श्लो. २१. हेतुफलात्मना, कारणभूतयोः पुण्यपापयोः फलभूतयोः सुखदुःखयोश्च रूपेण । श्लो. २२. परिभावितः ध्यातः । तत्कर्ममलैः प्रसिद्धैर्दुष्कृतरूपैर्दोषैः । श्लो. २३. तत्परिभावनाविधेः, तस्यात्मनः परिभावनाया ध्यानस्य विधेर्विधानात् । सम्यक्त्वम्, सम्यग्दर्शनम् । विपर्ययम्, मिथ्यात्वम् । श्लो २४. सरागसम्यक्त्वगुणैः, अप्रत्याख्यानादिकषाययुक्तैः सम्यग्दर्शनगुणैः सम्यक्चारित्रैः । अमन्दमेधसः, अनल्पबुद्धयस्तीर्थकराः । रुचिम्, श्रद्धाम् । श्लो. २५ उर्वकाकामसेवा, ऊर्जितं ब्रह्मचर्यम् । अमूर्च्छनम्, अभिलाषराहित्यम् । श्लो २६ अमोघवाक्यताम्, सफलवाक्यत्वम् । श्लो. २७. अमूर्च्छाव्रतिनः, विषयानभिलाषरूपव्रतयुक्तस्य । प्रवेदनम्, परिज्ञानम् । किमङ्गात किं पुनरर्थे । हिताहितादानविवर्जनं, हितस्यादानं अहितस्य विवर्जनं च । श्लो ३३ "हिंसानृतस्तेयाब्रह्मपरिग्रहेभ्यो विरतिर्व्रतम् ।

हिंसादिभ्यो देशेन विरतिरणुव्रतम् । सर्वतो विरतिर्महद्व्रतम् । अणु सूक्ष्मम् । महत् बृहत् । अणूनि व्रतान्यस्य सोऽणुव्रतोऽगारीत्युच्यते । कुतोऽस्य व्रतानामणुत्वमिति चेत्सत्यम् । सर्वसावद्यनिवृत्त्यसंभवात् । कुतस्तर्ह्यसौ निवृत्त इति । उच्यते । द्वीन्द्रियादिजङ्गमप्राणिवधात्रिधा निवृत्तोऽगारीत्याद्यमणुव्रतम् । स्नेहद्वेषमोहवशाद्यदसत्याभिधानं ततो निवृत्तादरो गृहीति द्वितीयमणुव्रतम् । अन्यपीडाहरं पार्थिवभयादिवशादवश्यं परित्यक्तमपि यदन्ततो निवृत्तः श्रावक इति तृतीयमणुव्रतम् । उपात्तानुपात्तान्याङ्गनासंगाद्विरतरतिर्विरताविरत इति चतुर्थमणुव्रतम् । धनधान्यक्षेत्रादीनामिच्छावशात्कृतपरिच्छेदो गृहीति पञ्चममणुव्रतं भवति"। अणुव्रतोत्तरां, अणुव्रतमेवोत्तरं श्रेष्ठं यस्याः ताम् । शौवनीं शुनां संबन्धिनीम् । कल्याणसुहृत् कल्याणसुहृन्नामा वणिक् । श्लो. ४१. तपसि स्थिरं वहन्, इति संगतः पाठः । पापर्धिर्मृगया । "पापर्धिर्मृगया खेटो मृगव्याच्छेदने अपि" इति हेमः । श्लो. ५०. पञ्चमात्परं स्वर्गं, पञ्चमाद्ब्रह्मकल्पात् परं स्वर्गं ब्रह्मोत्तरकल्पमित्यर्थः । पञ्चमीं दुर्गतिम्, धूमप्रभां नाम नरकभूमिम् । श्लो. ५१. तदा गृहीतं नरनाथवैभवम्, इति पाठान्तरम् । श्लो. ६०. विमोक्षविद्यासु गणैरशिक्ष्यत, इति संगतः पाठः । स्थविरसंततिस्था गणाः । श्लो ६९. बहिरन्तरिति द्विभेदं तपः । "उपवासावमोदर्ये वृत्तिसंख्या रसोज्झनम् । विविक्तशासना कायक्लेशश्चेति बहिर्भवम्" ॥ उपवासोऽनशनम् । दृष्टफलानपेक्षमन्तरङ्गतपःसिध्द्यर्थमभोजनमनशनम् । तदवधृतकालमनवधृतकालं च संयमप्रजागरणार्थमेव हानोदरत्वमवमोदर्यम् । एकागाररथ्याप्रासादिसंकल्पैः कायचेष्टा वृत्तिपरिसंख्यानम् । घृतादिरसपरित्यजनं रसपरित्यागः । योषिदसंपृक्तं शय्यासनं विविक्तशय्यासनम् । स्वयंकृतस्थानमौनादिक्लेशः कायक्लेशः । बाह्यतपस आभ्यन्तरपःसाधकत्वम् । 'न हि बाह्यतपोहीनमाभ्यन्तरतपो भवेत्' इत्युक्तेः । तथाभ्यन्तरं तपः षड्विधम् । 'स्वाध्यायो व्यापृतिर्ध्यानं व्युत्सर्गो विनयस्तथा । प्रायश्चित्तमिति ज्ञेयमान्तरं

चैत्रिंधं तपः' ॥ श्लो. ६०. तृतीये त्रिदिवे, सनत्कुमारकल्पे । श्लो. ७०. ईशानकल्पे द्वितीयस्वर्गे ।

इति रङ्गनाथीया पददीपिका समाप्ता ।

——:o:——

जैनदर्शनसंग्रहः ।

"अथेदानीं जिनदिगम्बरादिशब्दव्यवहृतस्यार्हतः सिद्धान्तः संक्षेपतः प्रतिपाद्यते । स हीत्थं मन्यते— जीवाजीवास्रवसंवरनिर्जरबन्धमोक्षनामानः सप्त पदार्थाः । पुनश्च संक्षेपतो द्विविधौ जीवाजीवभेदात् । जीवो बोधात्मकः । जडवर्गस्त्वजीवः । तत्र जडवर्ग एवास्रवादीनामन्तर्भावः । तयोरेव जीवाजीवयोरवान्तरभेदाः पञ्चास्तिकायाः । अस्तीति कायन्ते शब्द्यन्त इत्यस्तिकायाः । जीवास्तिकायः पुद्गलास्तिकायो धर्मास्तिकायोऽधर्मास्तिकायो गगनास्तिकायश्चेति । तत्र जीवास्तिकायस्त्रिविधः— बद्धो मुक्तो नित्यसिद्धश्चेति । तत्र कर्माष्टकशालिनो जीवा बद्धाः । तद्विनिर्मुक्ता मुक्ताः । जिनापरनामार्हन्नित्यसिद्ध इति । पुद्गलास्तिकायाः षोढा— पृथिव्यादीनि चत्वारि भूतानि स्थावरं जङ्गमं चेति । पुद्गलाः परमाणवः, तैरारब्धतया पृथिव्यादयः पुद्गलास्तिकायशब्देन व्यवह्रियन्ते । धर्माधर्मास्तिकायौ पुनर्वक्ष्यमाणद्विविधप्रवृत्त्या शास्त्रीयाशास्त्रीययानुमीयमानावान्तरापूर्वशब्दितौ च । तत्र धर्मास्तिकायो जीवस्य मोक्षहेतुः । अधर्मास्तिकायः पुनर्मोक्षपरिपन्थी तस्य जीवस्य देहावस्थानहेतुः । गगनास्तिकायो द्विविधः— लोकाकाशालोकाकाशभेदात् । तत्रोपर्युपरिस्थितानां लोकानामन्तर्वर्ती लोकाकाशः । तेषामुपरि मोक्षस्थानमलोकाकाशः, तत्र हि न लोकाः सन्तीति ।

तदेवं जीवाजीवपदार्थौ प्रपञ्चितौ । लोके प्रवृत्तिर्हि सम्यङ्मिथ्या चेति द्विविधा । तत्र मिथ्याप्रवृत्तिरास्रवः । आस्रावयति पुरुषं विषयेष्विति विषयगोचरेन्द्रियप्रवृत्तिरास्रव इत्युच्यते । इन्द्रियद्वारा हि पौरुषी चिच्छक्तिर्विषयाननुप्रविश्य तत्तदिन्द्रियविषयरूपादिज्ञानरूपेण परिणमत इति तन्मतस्थितिः । तदेकदेशिनस्तु— कर्तारमभिव्याप्य स्रवन्त्यनुगच्छन्तीत्यास्रवः कर्माणीत्याहुः । मतद्वयेऽपीयं मिथ्याप्रवृत्तिः, पुरुषानर्थहेतुत्वात् । संवरनिर्जरौ तु सम्यक्प्रवृत्ती । तत्र शमदमादि-रूपा प्रवृत्तिः संवरः । सा हि पुरुषस्य पूर्वोक्तास्रवप्रवाहद्वारं संवृणोति प्रच्छादयतीति सा संवर इत्युच्यते । निर्जरस्त्वनादिकालप्रवृत्तवासना-कलुषितपुण्यापुण्यप्रहाणसाधनभूतस्तप्तशिलारोहणकेशोल्लुञ्छनादिः । सोऽयं तपःशब्दितो निःशेषपुण्यापुण्ये कायक्लेशजनितसुखदुःखोपभोगेन जरयतीति निर्जर इत्युच्यते । बन्धस्तु जीवगतमष्टविधं कर्म । तत्र घातिकर्म चतुर्विधम् । यथा ज्ञानावरणीयं दर्शनावरणीयं मोहनीय-मन्तरीयमिति । तत्र सम्यग्ज्ञानं न मोक्षसाधनम्; न हि ज्ञानात्कस्य-चिद्वस्तुनः सिद्धिरस्ति, आशामोदकज्ञानादपि मोदकादिसिद्ध्यापत्तेरिति विपर्ययः । अनेन हि सम्यग्ज्ञानमाव्रियत आच्छाद्यत इति ज्ञानमा-वरणीयमाच्छादनमस्येति ज्ञानावरणीयं कर्मोच्यते । आर्हतदर्शनाभ्या-सान्मोक्षो न भवतीति ज्ञानं दर्शनावरणीयं कर्म । तेन हि ज्ञानेन दर्शनशब्दितं मतमाच्छाद्यत इति । परस्परं विरुद्धेषु तत्तत्तीर्थकरैरुप-दिष्टेषु मोक्षमार्गेषु विशेषानवधारणं मोहनीयं कर्म मोहसाधनभूतम् । मोक्षमार्गप्रवृत्तानां मोक्षविघ्नकारि विज्ञानमन्तरीयं कर्म । तदेतत्कर्म चतुर्विधं पुरुषश्रेयोविघातकत्वाद्घातिकर्मेत्युच्यते । अघातिकर्मापि चतुर्विधम् — वेदनीयं नामिकं गोत्रिकमायुष्कं चेति । तत्र देहा-रम्भकपुद्गलसंज्ञितशुक्लपरमाणूनां विपाकस्य शरीराकारेण परिणा-मस्य हेतुभूतं कर्म वेदनीयमित्युच्यते । न चास्य बन्धहेतुत्वेन निःश्रेय-सपरिपन्थितया घातितया कथमघातिमध्ये परिगणनमिति वाच्यम् । शरीरारम्भद्वारा तस्य तत्त्वज्ञानानुकूलतया अघातित्वोपपत्तेः; शुक्ल-

पुद्गलस्य कललाख्यद्रव्यात्मकावस्थाया बुद्बुदाकारस्य चारम्भकः क्रियाविशेषो नामकं कर्म। तस्यैव शुक्रपुद्गलस्य देहाकारपरिणाम-शक्तिर्नामिककर्मण आद्यावस्था अव्याकृतसंज्ञिता गोत्रिकमित्युच्यते। शुक्रशोणितपरमाणुव्यतिकरे जाते मिलितं तदुभयस्वरूपमायुष्कमिति गीयते। आयुः कायति कथयत्युत्पादनद्वारेति व्युत्पत्तेः। अत्र पूर्वपूर्वस्योत्तरोत्तरमारम्भकम्। तदेतत्कर्माष्टकं पुरुषं बध्नातीति बन्ध इत्युच्यते। मोक्षस्तु विगलितसकलक्लेशतद्वासनस्यानावरणज्ञानस्या-नन्दैकस्वभावस्यात्मन उपरिदेशावस्थानमित्येके। अन्ये तु ऊर्ध्व-गमनस्वभावस्य जीवस्य धर्माधर्मास्तिकायेन संबन्धो बन्धः; ज्ञानेन धर्माधर्मास्तिकायविनाशे स्वीयस्वाभाविकसततोर्ध्वगमनानुवृत्तिर्मोक्षः। यदुक्तमनन्तवीर्येण— 'गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः। अद्यापि न निवर्तन्ते ह्यलोकाकाशमार्गगाः' इतीत्याहुः। तदेवं जीवा-जीवादयः सप्त पदार्था अवान्तरभेदैः सह प्रपञ्चिताः। तेषु पदार्थेषु सत्त्वैकत्वनित्यत्वादयो नैकान्तेन निर्धारयितुं शक्याः। तथा हि— वस्तुनि सत्त्वनियमो यद्यस्त्येव ततः सदा सर्वत्र सर्वात्मना सदेवेति न तदाप्तुमिच्छा वा जिहासा वा स्यात्। ततश्च हानोपादानेच्छयोर-भावे न क्वचिदपि कदाचिदपि कश्चिदपि प्रवर्तेत, कुतश्चिन्निवर्तेत वा। अनियमपक्षे तु वस्तुनः कादाचित्कसत्त्वासत्त्वाभ्यां तदिच्छा-जिहासयोः संभवेन हानोपादाने प्रेक्षावतामवकल्पेते इति। ततश्च स्यादस्ति पदार्थः, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति च नास्ति चावक्तव्यश्च, इत्येते सप्तैकान्तभङ्गाः। एकान्तो नियम इत्यर्थः। सप्तानां भङ्गानां समाहारः सप्तभङ्गी। अत्र स्याच्छब्दस्तिङन्तप्रति-रूपक ईषदर्थे निपातितः ईषदस्तीत्येवमादिरूपेण वस्त्वनेकान्तत्वे पर्यवस्यति। एते च सप्तैकान्तभङ्गाः, कथं कथं कदा कदा च प्रवर्तन्त इत्यपेक्षायामनन्तवीर्यस्तत्प्रवृत्तिप्रतिपादनप्रकारं दर्शितवान्— तद्वि-धानविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगः स्यात्तन्नि-

धे विवक्षिते ॥ क्रमेणोभयवीक्षायां प्रयोगः समुदायभृत् । युगपत्त-द्विवक्षायां स्याद्वाच्यमशक्तितः ॥ आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते । अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥ समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते ' इति । अत्राद्यसार्धश्लोकः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति चेति त्रिषु भङ्गेषु प्रवर्तते । द्वितीयश्लोकोत्तरार्धे तु युगपदस्तित्वनास्तित्वयोर्विवक्षायां वाचः क्रमवृत्तित्वादुभयं युगपद्वाच्यमसामर्थ्यादिति चतुर्थे भङ्गे पर्यवस्यति । तृतीयश्लोक-पूर्वार्धे त्वाद्योऽस्तित्वभङ्गः अन्त्येनासत्त्वेन सह युगपद्वाच्य इति स्यादस्ति चावक्तव्यश्च इत्येवंरूपे पञ्चमे भङ्गे प्रवर्तते । तदुत्तरार्धे तु अन्त्यश्चासत्त्वभङ्ग आद्येन स्यादस्तीति भङ्गेन सह युगपद्वाच्य इत्य-स्मिन्षष्ठे भङ्गे स्यान्नास्ति चावक्तव्यश्चेत्येवंरूपे पर्यवस्यति । तदुत्तरमर्धं तु स्यादस्ति च नास्ति चेत्येवंरूपे एकैकेन स्यादस्ति स्यान्नास्तीत्यनेन सह युगपद्वाच्य इत्यर्थे । एवमेकत्वादिष्वपि स्यादेकः, स्यादनेकः, स्यादेक-श्चानेकश्च, स्यादवक्तव्यः, स्यादेकश्चावक्तव्यश्च, स्यादनेकश्चावक्तव्यश्च, स्यादेकश्चानेकश्चावक्तव्यश्च, इत्येवं सर्वत्र सप्तभङ्गीनयं योजयन्ति । जीवश्च नाणुर्न विभुः, परस्परपक्षोक्तदूषणेन प्रतिक्षेपात्, किं तु शरीरपरिमाणः । मनुष्यशरीरगतो जीवो मनुष्यशरीरपरिमाणः, हस्ति-शरीरगतो जीवो हस्तिशरीरपरिमाणः, मशकशरीरगतो जीवो मशक-शरीरपरिमाण इति । न चैवमवयवोपचयापचयाभ्यामनित्यत्वप्रसङ्गः, वस्तुनेकान्तवादिनस्तददोषादित्यार्हतसिद्धान्तरहस्यम्" ॥

इत्यवैदिकदर्शनसंग्रहे

अत्र संस्कृतकाव्ये भाषाप्रबन्धे च सदृशतमानि कानिचित्पद्यानि ॥

"अहिंसनं सत्यमचौर्यमुच्चकै-
रकामसेवा विषयेष्वमूर्च्छनम् ।
व्रतानि पञ्चेति फलं त्वनुक्रमा-
द्विभज्य तेषामिति वर्ण्यते बुधैः ॥
अहिंसनं वैरहरं परं भवे-
त्तनोति सत्यं तदमोघवाक्यताम् ।
अचौर्यमाकर्षति रत्नसंचयं
बलावहं ब्रह्मचरित्रमूर्जितम् ॥
भवस्य पूर्वापरकोटिभाविनो
भवत्यमूर्च्छाव्रतिनः प्रवेदनम् ।
त्यजन्ति सन्तो मधुमद्यमांसकं
व्रतेषु पुष्टिं विधिवद्विधित्सवः" ॥

"பெருகியகொலையும்பொய்யுங்களவொடுபிறர்மனைக்கட்
டெரிவிலாச்செலவுமிக்கபொருள்கையிற்றிருகுபற்றி
மருவியமனத்துமீட்சிவதமிவையைந்தோடொன்றி
யொருவினபுலைசுதேன்கள்ளொருவுதலொழுக்கமென்றான்.
கொலையினதின்மைகூரார்குலையத்திறைமைசெய்யு
மலைதலில்வாய்மையார்க்கும்வாய்மொழிமதிப்பையாக்கும்
விலையில்பேரருளின்மாட்சிவிளைப்பதுகளவின்மீட்சி
புலைதவில்பெருமைதிட்பமுறுவலியெழிந்தீயும்.
தெருளுடைமனத்திற்சென்றுதெளிந்துணர்வாயசெல்வம்
பொருள்கையினிறுக்கமின்மைபுணர்ந்திடும்புலைசுதேன்க
ளொருவியபயனுமோங்கித்தேயொளியினொடழகுவென்றி
பொருண்மிகுகுலனேடின்பம்புணர்தலுமாகுமாதோ."

யசோதரகாவியம்.

श्रीवादिराजसूरिः ।

यशोधरचरित्राख्यस्य प्रणेता वादिराजः कविर्दिगम्बरजैनो यतिः । अस्य कृतयः पार्श्वनाथचरितं काकुत्स्थचरितमेकीभावस्तोत्रं चेति तिस्रोऽप्यन्याः परिज्ञायन्ते । पार्श्वनाथचरितं काकुत्स्थचरितं चात्मना कृत इति स्वयमेवाह कविर्यशोधरचरिते । यथा,

"श्रीपार्श्वनाथकाकुत्स्थचरितं येन कीर्तितम् ।

तेन श्रीवादिराजेन दृब्धा याशोधरी कथा ॥" १।५.८

एकीभावस्तोत्रं काव्यमालायाः सप्तमे गुच्छे निर्णयसागरयन्त्रालये प्रकाशितम् । काकुत्स्थचरितं बहुधान्वेषितमपि नोपलब्धम् । वादिराजः सिंहपुरवास्तव्यस्य त्रैविद्यविद्येश्वर इति प्रथावतः श्रीपालदेवस्य प्रशिष्यः, मतिसागरमुनेः शिष्यः, विश्रुतरूपसिद्धिकारस्य दयापालमुनेः सब्रह्मचारी च । पार्श्वनाथचरितमनेन श्रीमति चौलुक्यचक्रेश्वरे जयसिंहे पालयति महीं ९४८ तमे शकाब्दे प्रणीतम् । सर्वमिदं तत एव काव्यतः स्पष्टमुपलभ्यते यथा,

"श्रीजैनसारस्वतपुण्यतीर्थनित्यावगाहामलबुद्धिसत्त्वैः ।
प्रसिद्धभागी मुनिपुंगवेन्द्रैः श्रीनन्दिसंघोऽस्ति निवर्हितांहः ॥
तस्मिन्नभूदद्भुतसंयमश्रीस्त्रैविद्यविद्याधरगीतकीर्तिः ।
सूरिः स्वयं सिंहपुरैकमुख्यः **श्रीपालदेवो** नयवर्त्मशाली ॥
तस्याभवद्भव्यमहोत्पलानां तमोपहो नित्यमहोदयश्रीः ।
निषेधदुर्मार्गनयप्रभावः शिष्योत्तमः **श्रीमतिसागराख्यः** ॥
तत्पादपद्मभ्रमरेण भूम्ना निःश्रेयसश्रीरतिलोलुपेन ।
श्रीवादिराजेन कथा निबद्धा जैनी स्वबुद्ध्येयमनिर्दयापि ॥

शाकाब्दे नगवार्धिरन्ध्रगणने संवत्सरे क्रोधने
मासे कार्त्तिकनाम्नि बुद्धिमहिते शुद्धे तृतीयादिने ।
सिंहे पाति जयादिके वसुमतीं जैनी कथेयं मया
निष्पत्तिं गमिता सती भवतु वः कल्याणनिष्पत्तये ॥

लक्ष्मीवासे वसति कटके कट्टगातीरभूमौ
कामावाप्तिप्रमदसुलभे सिंहचक्रेश्वरस्य ।
निष्पन्नोऽयं नवरससुधास्यन्दसिन्धुप्रबन्धो
जीयादुच्चैर्जिनपतिभवप्रक्रमैकान्तपुण्यः ॥" १२ सर्गे ।

वादिराजस्यास्येमानि प्रशंसापद्यानि श्रवणबेलगोले शिलोत्कीर्णायां मल्लिषेणप्रशस्तौ दृश्यन्ते । यथा,

"अपि स्ववाग्व्यस्तसमस्तविद्यत्रैविद्यशब्देऽप्यनुमन्यमानः ।
श्रीपालदेवः प्रतिपालनीयः सतां यतस्तत्त्वविवेचनी धीः ॥
तीर्थं **श्रीमतिसागरो** गुरुरिलाचक्रं चकार स्फुर-
ज्ज्योतिःपीततमःपयःप्रवितितिः पूतं प्रभूताशयः ।
यस्माद्भूरिपरार्घ्यपावनगुणश्रीवर्धमानोल्लस-
द्रत्नोत्पत्तिरिलातलाधिपशिरःशृङ्गारकारिण्यभूत् ॥
हितैषिणो यस्य नृणामुदात्तवाचा निबद्धा हित**रूपसिद्धिः** ।
वन्द्यो **दयापालमुनिः** स वाचा सिद्धः सतां मूर्धनि यः प्रभावैः ॥
यस्य **श्रीमतिसागरो** गुरुरसौ चञ्चद्यशश्चन्द्रभूः
श्रीमान्यस्य स **वादिराज**गणभृत्सब्रह्मचारी विभोः ।
एकोऽतीव कृती स एव हि **दयापालव्रती** यन्मन-
स्यास्तामन्यपरिग्रहग्रहकथा स्वे विग्रहे विग्रहः ॥
त्रैलोक्यदीपिका वाणी द्वाभ्यामेवोदगादिह ।
जिनराजत एकस्मादेकस्माद्वादिराजतः ॥
आरूढाम्बरमिन्दुबिम्बरचितौत्सुक्यं सदा यद्यश-
श्छत्रं वाक्चमरीजराजिरुचयोऽभ्यर्णं च यत्कर्णयोः ।
सेव्यः सिंहसमर्च्यपीठविभवः सर्वप्रवादिप्रजा-
दत्तोच्चैर्जयकारसारमहिमा श्रीवादिराजो विदाम् ॥
यदीयगुणगोचरोऽयं वचनविलासप्रसरः कवीनाम् ।
श्रीमच्चौलुक्यचक्रेश्वरजयकटके वाग्वधूजन्मभूमौ
निष्काण्डं डिण्डिमः पर्यटति पटुरटो वादिराजस्य जिष्णोः ।

जल्पद्यद्वाददर्पो जहिहिगमकतागर्वभूमा जहाहि-
व्याहारेष्यों जहीहिस्फुटमृदुमधुरश्रव्यकाव्यावलेपः ॥
पाताले व्यालराजो वसति सुविदितं यस्य जिह्वासहस्रं
निर्गन्ता स्वर्गतोऽसौ न भवति धिषणो वज्रभृद्यस्य शिष्यः ।
जीवेतां तावदेतौ निलयबलवशाद्वादिनः केऽत्र नान्ये
गर्वं निर्मुच्य सर्वे जयिनमिनसभे वादिराजं नमन्ति ॥
वाग्देवीसुचिरप्रयोगसुदृढप्रेमाणमप्यादरा-
दादत्ते मम पार्श्वतोऽयमधुना श्रीवादिराजो मुनिः ।
भो: भो: पश्यत पश्यतैष यमिनां किं धर्म इत्युच्चकै-
रब्रह्मण्यपराः पुरातनमुनेर्वाग्वृत्तयः पान्तु वः ॥" इति,
रैस्महाशयप्रकाशितमल्लिषेणप्रशस्तौ ।

इदमन्यदस्य कवेः प्रशंसापद्यमेकीभावस्तोत्रस्यावसाने दृश्यते—
'वादिराजमनु शाब्दिकलोको वादिराजमनु तार्किकसिंहः ।
वादिराजमनु काव्यकृतस्ते वादिराजमनु भव्यसहायः ॥' इति ।
दाक्षिणात्योऽयं कविरिति प्रतीयते । षट्तर्कषण्मुख-स्याद्वादविद्या-
पति-जगदेकमल्लवादीत्याद्युपाह्वश्च ।

'श्रीमद्द्रमिलसंघेऽस्मिन्नन्दिसंघेऽस्त्यरुङ्गलः ।
अन्वयो भाति योऽशेषशास्त्रवाराशिपारगः ॥

*　　*　　*　　*　　*

सदसि यदकलङ्कः कीर्तने धर्मकीर्ति-
र्वचसि सुरपुरोधा न्यायवादेऽक्षपादः ।
इति समयगुरूणामेकतः संगतानां
प्रतिनिधिरिव देवो राजते वादिराजः ॥'

(*Vide Ins. No. 39, Nagar Taluq, by Mr. Rice.*)

'षट्तर्कषण्मुखरुं स्याद्वादविद्यापतिगळुं जगदेकमल्लवादिगळुं एनि-
सिद श्रीवादिराजदेवरुम्'

(*Vide No. 36 ibid.*)

अस्य समकालवर्ती पण्डितपारिजातापरनामा श्रीविजयभट्टारको यस्येदं प्रशंसापद्यद्वयं मल्लिषेणप्रशस्तौ—

'गङ्गावनीश्वरशिरोमणिबन्धसंध्यारागोल्लसच्चरणचारुनखेन्दुलक्ष्मीः ।
श्रीशब्दपूर्वविजयान्तविनूतनामा धीमानमानुषगुणोऽस्ततमःप्रमांशुः ॥

स्तुतो हि स भवानेष श्रीवादिराजदेवेन—

यद्विद्यातपसोः प्रशस्तमुभयं श्रीहेमसेने मुनौ
प्रागासीत्सुचिराभियोगबलतो नीतं परामुन्नतिम् ।
प्रायः श्रीविजये तदेतदखिलं तत्पीठिकायां स्थिते
संक्रान्तं कथमन्यथानतिचिराद्विद्येदृगीदृक्तपः ॥' इति ।

गद्यचिन्तामणि- क्षत्रचूडामणिकाव्ययोः प्रणेतुर्वादीभसिंह इति प्रथावतोऽजितसेनमुनेर्विद्यागुरुः पुष्पसेनमुनिर्वादिराजस्यास्यापरः सामानकालिकः । *(Vide No. 36 ibid.)*

यशोधरराजचरित्रप्रख्यापकाश्चत्वारः सन्ति काव्यप्रबन्धाः । तत्र पूर्णदेवप्रणीतो यशोधरचरिताभिधः पद्यकाव्यप्रबन्ध एकः । एकादशशतकस्य (A. D.) द्वितीयपादे वादिराजेन प्रणीतोऽयमपरः । ९५८ तमे क्रिस्ताब्दे सोमदेवेन संग्रथितो यशस्तिलकचम्पूर्नाम चम्पूप्रबन्धस्तृतीयः । अज्ञातकर्तृको यशोधरकाव्याभिधः पद्यात्मको द्रविडभाषाप्रबन्धश्चतुर्थः । अत्र चतुर्ष्वपि प्रबन्धेषु, वादिराजकृतयशोधरचरितस्य भाषाप्रबन्धयशोधरकाव्यस्य च तत्र तत्र परस्परं सुतरां समुल्लसति साधर्म्यम् । अतो वादिराजकृतयशोधरचरितमेव भाषाप्रबन्धस्य मूलमिति दिक् । चतुर्णां पुनरेतेषां काव्यप्रबन्धानां गुणभद्राचार्यप्रणीतोत्तरपुराणान्तर्गतसुव्रततीर्थकरकथायां विद्यमानं यशोधरचरितमेव मूलमिति निर्विवादम् ।

इति

टि. एस्. कुप्पुस्वामिशास्त्री.

॥ श्रीः ॥

श्रीवादिराजसूरिप्रणीतम्

॥ यशोधरचरितम् ॥

श्रीमदारब्धदेवेन्द्रमयूरानन्दनर्तनम् ।
सुव्रताम्भोधरं वन्दे गम्भीरनयगर्जितम् ॥ १ ॥

अस्माकं जिनसिद्धश्रीसूर्युपाध्यायसाधवः ।
कुर्वन्तु गुरवः सर्वे निर्वाणपरमश्रियम् ॥ २ ॥

श्रीमत्समन्तभद्राद्याः काव्यमाणिक्यरोहणाः ।
सन्तु नः संततोत्कृष्टाः सूक्तिरत्नोत्करप्रदाः ॥ ३ ॥

इतिहाससमासोऽयमत्रावहितचेतसाम् ।
आस्रवन्ति शुभान्युच्चैर्निर्जीर्यन्त्यशुभान्यपि ॥ ४ ॥

वर्धयत्येष संवेगं विधत्ते शुद्धदृष्टिताम् ।
प्रध्वस्तीकुरुते व्याधीनाधीनपहरत्यलम् ॥ ५ ॥

श्रीपार्श्वनाथकाकुत्स्थचरितं येन कीर्तितम् ।
तेन श्रीवादिराजेन दृब्धा याशोधरी कथा ॥ ६ ॥

इहास्ति भारते वास्ये देशे यौधेयनामनि ।
पुरं राजपुरं नाम्ना राजराजपुरोपमम् ॥ ७ ॥

कार्तस्वरमयो यस्य परिधिश्चुम्बिताम्बुदः ।
भाति मध्यंदिनार्कस्य परिवेष इवान्वहम् ॥ ८ ॥

प्रासादशिखरप्रोतपद्मरागमरीचिभिः ।
मध्याह्नार्कातपो यत्र मिश्रो बालातपायते ॥ ९ ॥

यन्नित्यं धनदावासकेतुभिर्वातकम्पितैः ।
दूरादाह्वयतीवोच्चैरर्थिनः सर्वदिङ्मुखैः ॥ १० ॥

यस्मिन्नसमलावण्यनिर्मितावयवा अपि ।
सर्वाङ्गमधुरायन्ते भोगिनां मृगलोचनाः ॥ ११ ॥

यत्र प्रत्युरसं नारीपयोधरपरिस्पृशः ।
कामदावाग्निसंतापान्मुच्यन्ते युवभूभृतः ॥ १२ ॥

यत्र च स्पृहयालुभ्यो दायं दायं व्ययीकृताः ।
अपि प्रत्यहमेधन्ते सतां विद्या इव श्रियः ॥ १३ ॥

अवाच्यां दिशि तस्यास्ति चण्डमारीति देवता ।
एकान्ततः प्रिया यस्याः प्राणिनामुपसंहृतिः ॥ १४ ॥

या च सत्त्वोपघातेन यथाकालमनर्चिता ।
राज्यराष्ट्रोपघाताय रौद्रमूर्तिः प्रकल्पते ॥ १५ ॥

आराधिता तु तत्पौरैरुचितोपक्रमेण या ।
दुर्भिक्षमारकव्याधिप्रध्वंसेन प्रसिध्यति ॥ १६ ॥

इषे चैत्रे च मास्यस्याः पुरः पौरैर्नृपान्वितैः ।
यात्रा निर्वर्त्यते चित्तप्रसादाद्वरलिप्सुभिः ॥ १७ ॥

न्यवेदयदिवागत्य मधुस्तस्यै निजागमम् ।
माकन्दकलिकास्वादमत्तकोकिलनिस्वनैः ॥ १८ ॥

उद्गिरन्दिशि दिश्युच्चै रक्ताशोकस्य मञ्जरीः ।
जहारेव बलिं तस्यै स कालः स्वस्य शोणितैः ॥१९

देवतावासचूतानां शाखासु परपुष्टकैः ।
शूल्यमांसैरिवातस्थे मधुनोपायनीकृतैः ॥ २० ॥

ततस्तदर्चनाकालं विलम्बयितुमक्षमः ।
देवतावासमायासीन्मारिदत्तो नराधिपः ॥ २१ ॥

पौराः पुरपतेस्तस्य नियोगादविलम्बितम् ।
आनिन्युरखिलाशाभ्यो युग्मं युग्मं तनूभृताम् ॥ २२

कुक्कुटच्छागसारङ्गवराहमहिषादयः ।
चुक्रुशुर्देवतावासे दीर्घबन्धनपीडिताः ॥ २३ ॥

तद्ध्वनिस्फारसंबाधान्निर्भिन्ना तत्र तत्र भूः ।
विवृताधोगतिद्वारबहुरन्ध्रेव निर्बभौ ॥ २४ ॥

प्रभुरुत्खातखड्गस्तु चण्डकर्माणमादिशत् ।
मृग्यतां मर्त्ययुगलं शुभलक्षणसंभृतम् ॥ २५ ॥

तस्मिन्मया स्वहस्तेन देव्यै व्यापादिते सति ।
पौरास्तांस्तान्विनिघ्नन्तु जीवांस्तिर्यक्प्रसारिणः ॥२६॥

अन्यथा विधिविध्वंसो देव्यै कोपमुपानयन् ।
बालस्त्रीपशुवृद्धानां विप्लवाय विजृम्भते ॥ २७ ॥

इति स्वामिनियोगेन चण्डकर्मा कृतत्वरः ।
प्रस्थाप्येतस्ततो भृत्यान्स्वयं चान्वेष्टुमव्रजत् ॥ २८ ॥

अस्मिन्नवसरे धीमान्पञ्चशत्या सुसंयतैः ।
आगतस्तत्पुरोद्यानं सुदत्तो मुनिपुंगवः ॥ २९ ॥

स त्रिदोषविनिर्मुक्तः सत्रिदण्डविवर्जितः ।
स त्रिशल्यापविध्वंसी स त्रिगारविदूरगः ॥ ३० ॥

स सप्तभयनिर्मुक्तः सत्त्वानामभयप्रदः ।
स स्वाध्यायपरो नित्यं स शुद्धज्ञानदीधितिः ॥ ३१ ॥

स एकस्तपसां धाम स व्रतानां महोदधिः ।
स भव्याम्बुजतिग्मांशुः स शीलाचारनिर्मलः ॥ ३२ ॥

स शंसितव्रतैः सार्धमासीनः पावने क्वचित् ।
मार्गातिचारनियमं तत्परो निरवर्तयत् ॥ ३३ ॥

ततः कृतोपवासायां तद्दिने मुनिसंहतौ ।
अनुजग्राह भिक्षार्थे स मुनिः क्षुल्लकद्वयम् ॥ ३४ ॥

प्रणिपत्य मुनिं गच्छत्तच्च तच्चण्डकर्मणा ।
जगृहे प्रथमं पश्चान्निन्ये राजपुरेश्वरम् ॥ ३५ ॥

तदाभयरुचिर्वाचमनुजामित्यवोचत ।
मानश्चेतः समाधेहि मा स्म मृत्योर्भयं कृथाः ॥ ३६ ॥

किं न वेत्सि चिराभ्याससुसहं दुःखमावयोः ।
कथं वा दुःखनिर्मुक्तिः काये तत्कारणे नृणाम् ॥३७॥

तस्मादवश्यभोक्तव्ये किमुद्वेगः करिष्यते ।
किं च तीव्रं तपः प्राहुः परीषहजयं बुधाः ॥ ३८ ॥

अग्रजस्य निशम्योक्तिमुवाचाभयमत्यपि ।
आवयोरस्ति किं भीतिर्ज्ञातपूर्वापरान्तयोः ॥ ३९ ॥

इदमेव हि विद्वत्त्वमिदमेव हि तत्फलम् ।
यन्मनो विदुषामुच्चैर्माध्यस्थ्यं सुखदुःखयोः ॥ ४० ॥

आश्वासयन्तावन्योन्यमिति तौ राजपुत्रकौ ।
आसेदतुरनाशङ्कौ चण्डमारीनिकेतनम् ॥ ४१ ॥

रक्तसंमार्जिता रक्ता नित्यं यस्याजिरक्षितिः ।
प्रसारितेव जिह्वोच्चैर्देव्या रक्तासवेच्छया ॥ ४२ ॥

मांसस्तूपाः स्वयं यत्र मक्षिकापटलावृताः ।
छर्दिताश्चण्डमार्येव बहुभक्षणदुर्जराः ॥ ४३ ॥

नवैर्नरशिरोभिर्यत्प्राकारशिखरोद्धृतैः ।
अन्वेष्टीवाशु जीवानां देवता बहुभिर्मुखैः ॥ ४४ ॥

राज्ञि संनिहिते तस्मिन्नाशिषं प्रेरितौ जनैः ।
तावाशीर्वादमीदृक्षमध्यैषातां मनीषिणौ ॥ ४५ ॥

सर्वसत्त्वहितो यस्तु सर्वलोकसुखप्रदः ।
विदध्यास्तेन धर्मेण राजन्राजन्वतीं क्षितिम् ॥ ४६ ॥

मारिदत्तस्तु तौ दृष्ट्वा निर्भयस्पष्टभाषिणौ ।
प्रशान्तश्चिन्तयामास विस्मयस्मेरलोचनः ॥ ४७ ॥

देवद्वन्द्वमिदं किं नु मानवाकारवञ्चितम् ।
उत स्विन्नागमिथुनं निर्जितस्मरतत्प्रियम् ॥ ४८ ॥

न कदाचिन्मया दृष्टमभिरूपकमीदृशम् ।
अहो चिराय मे जाता नेत्रदृष्टिः फलावहा ॥ ४९ ॥

अपि चोत्खातखड्गं मां दृष्ट्वा देवीं च निष्कृपाम् ।
न चित्तमनयोस्त्रस्तमहो शौर्यमनुत्तरम् ॥ ५० ॥

इत्यपृच्छदभिव्यक्तं कौ युवां कुत आगतौ ।
किंकुलौ किंनिमित्तं वा बाल्ये भोगास्पृहावुभौ ॥५१॥

ततोऽभयरुचिर्धीमांस्तस्योत्तरमुदाहरत् ।
वाङ्मयूखैर्निराकुर्वन्दुरन्तं दुरितं तमः ॥ ९२ ॥

आवयोश्चरितं राजन्धार्मिकेभ्योऽभिरोचते ।
अधर्मरसिकश्चासि त्वं तत्किमभिलप्यते ॥ ९३ ॥

प्रकृतिर्विपरीता न क्षमते गुणदर्शनम् ।
पित्तज्वरवतः क्षीरं मधुरं नावभासते ॥ ९४ ॥

तदलं कथयास्माकं कुरु पथ्यं यदात्मनः ।
यच्च कर्मानुरूपं नस्तदस्तु प्रगुणा वयम् ॥ ९५ ॥

इत्युक्तस्तेन निस्त्रिंशं निरस्य रचिताञ्जलिः ।
निर्बन्ध नृपो भूयः कुमारोऽप्यब्रवीदिदम् ॥ ९६ ॥

तदास्थानसरः सर्वं करवारिजकुट्मलैः ।
पूजयामास बालेन्दुं धर्मामृतरसच्युतम् ॥ ९७ ॥

भो भो नराधीश्वर साधु साधु
त्वया मतिर्धर्मपथे निबद्धा ।
कालेन भव्यत्वगुणो हि दीप्तिः
कल्याणबुद्धिं कुरुते नराणाम् ॥ ९८ ॥

धर्मामृतस्यन्दिनि सूक्तिसारे
ततोऽवधानं कुरु मामकीने ।

श्रद्धानबुद्ध्या हि निशम्यमानो
निःशेषयत्येतदशेषदुःखम् ॥ ५९ ॥

इदं न साक्षात्कृतविश्वतत्त्वै-
र्जिनेश्वरैः केवलमभ्यधायि ।
तदा तदा दुःखसहस्रदग्धै-
रस्माभिरप्यन्वहमन्वभावि ॥ ६० ॥

तत इदं चरितामृतमावयोः
सकलदोषपरिक्षयकारणम् ।
तव नरेन्द्र वदामि सविस्तरं
समवधेहि सतां प्रतिभाषितम् ॥ ६१ ॥

एतत्सारमुदारसौख्यसुभगस्थानोपपत्तिप्रदं
कल्याणं तदिहावबद्धमतयः संशृण्वते ये बुधाः ।
तेऽमी कुन्दशशाङ्कनिर्मलयशःश्रीदिग्धदिग्भित्तयः
श्रेयः शाश्वतमाप्नुवन्ति भुवने भुक्तोरुभोगश्रियः ॥

इति वादिराजसूरिविरचिते यशोधरचरिते प्रथमः सर्गः ॥

॥ द्वितीयः सर्गः ॥

अस्त्यूर्जितावन्तिषु कान्तभोगैः
　　पुरी जगत्युज्जयिनी प्रसिद्धा ।
माहोदयामाह्वयते समृद्ध्या
　　या राजधानीं शतयज्वनोऽपि ॥ १ ॥

अनेकयुद्धेष्ववलिप्तवैरि-
　　विध्वंसनाविष्कृतविक्रमश्रीः ।
बभूव तस्यां नयविन्नरेन्द्रो
　　यशोघ इत्यूर्जितनामधेयः ॥ २ ॥

स घंसते यत्कुमुदावदातं
　　यशो दिशां भित्तिषु बद्धलेपम् ।
ततस्तमाहुः कवयो यशोघं
　　पृषोदराद्युक्तनिरुक्त्यभिज्ञाः ॥ ३ ॥

तस्यार्पिता प्रत्युरसं रहस्ये
　　चर्चेव नित्यं हरिचन्दनस्य ।
प्रवृद्धरागा स्मरतापमुच्चै-
　　श्चन्द्रानना चन्द्रमती जहार ॥ ४ ॥

तयोरतुल्यो नयविक्रमाभ्या-
　　मासीत्सुपुत्रः स यशोधराख्यः ।

अभ्युद्धरन्दिक्षु यशः प्रकाशं
  क्षीरोदकल्लोलकलापशुभ्रम् ॥ ५ ॥

विमुच्य कान्तिः शरदिन्दुबिम्बं
  भूयः क्षयापत्तिभयातुरेव ।
तस्याक्षयश्रीनिलयस्य वक्त्रं
  व्याकोचनीलोत्पलमध्युवास ॥ ६ ॥

उरस्तु विस्तीर्णमुदारधाम्न-
  स्तस्योल्लसन्मौक्तिकहारयष्ट्या ।
श्रियस्तदन्तर्वसतेर्विरेजे
  संभोगहासप्रभयेव बद्धम् ॥ ७ ॥

घनौ भुजौ तस्य भुजंगदीर्घौ
  देहाविव द्वौ रणविक्रमस्य ।
अरातिराजोर्जितमण्डलाना-
  मकल्पिषातामिव राहुकेतू ॥ ८ ॥

निस्त्रिंशनिर्धारितवैरिकुम्भी
  समग्रसिंहः स पराक्रमेण ।
तन्वा तु सौन्दर्यनिवासभूम्या
  जगाम कीर्तिं भुवि सिंहमध्यः ॥ ९ ॥

तस्योत्तमाशेषगुणस्य कश्चि-
  न्न मध्यमो नापि गुणो जघन्यः ।

तस्मिन्न भेजुस्तत एव तृप्तिं
ताभ्यां सकामा हि नितम्बवत्यः ॥ १० ॥

पादौ तदीयौ नवपद्मरागौ
क्रियाविधानादुपलब्धशोभौ ।
किमद्भुतं यत्पृथिवीपतीनां
चूडामणित्वं गुणतोऽजिहाताम् ॥ ११ ॥

देवी तु तस्यामृतमत्यभिख्या
सेन्दो रसांशैरिव निर्मिताङ्गी ।
नामेव कुर्वन्नलिकामजस्रं
तन्मानसास्वादमबोधि कामः ॥ १२ ॥

यशोमतिं नाम यशोघपौत्रं
यशोमृताप्यायितविश्वलोकम् ।
तया स पुत्रं जनयांबभूव
पूतक्रताय्येव जयन्तमिन्द्रः ॥ १३ ॥

तत्रात्मसंपद्गुणवत्युदारे
यूनि प्रयुज्याखिलराज्यभारम् ।
निराकुलस्वान्तनिसृष्टरागः
श्रियं यशोघश्चिरमन्वभुङ्क्त ॥ १४ ॥

अथैकदास्थानगतस्तु राजा
निषेव्यमाणो नरलोकनाथैः ।

आदर्शदृष्टया पलितानि दृष्ट्वा
जघान तृष्णां विषयेषु भव्यः ॥ १५ ॥

राज्यं पृथिव्याः प्रतिपाद्य सद्यो
यशोधरायोर्जितविक्रमाय ।
विरक्तिभाजां नु शतेन राज्ञां
तपोवनं भूमिपतिर्जगाम ॥ १६ ॥

तस्मिन्नेव भर्तरि सानुरागा
सा स्त्रीस्वभावादिव राज्यलक्ष्मीः ।
अनारतं तत्कृतयेव भक्त्या
सुव्यक्तमङ्गेषु बभूव पुष्टा ॥ १७ ॥

गुणामृतैस्तस्य निषिच्यमाना
पत्युर्वियोगेन विमुच्य तापम् ।
ससञ्ज तस्मिन्प्रकृतिः समस्ता
सौरीव नीहारकरे मरीचिः ॥ १८ ॥

क्रोधावहं तच्चरितं न पुंसा-
मुद्धजनोऽसौ न विविच्यकारी ।
न चावमन्ता विनयोत्तरश्री-
र्दाता स लोभं न सहिष्णुरासीत् ॥ १९ ॥

तेजोमयं तस्य नृपस्य चक्षु-
र्निमील्य तन्मुख्यमवाप्य निद्राम् ।

अन्येन सर्वाङ्गभुवा तु जाग्र-
त्स तस्कराणामहरत्प्रवृत्तिम् ॥ २० ॥

मन्त्रक्रियाभ्यामसियष्टिवेद्यां
स्वतेजसाभिज्वलितेन राजा ।
निरास्थदुद्यद्रिपुकेतुदौःस्थ्यं
समग्रसिद्ध्यै निजमण्डलस्य ॥ २१ ॥

दिनावसाने स विसृज्य लोकं
प्रासादमारुह्य सरत्नभित्तिम् ।
कदाचिदासिष्ट मनोजतृप्त्यै
स प्रेयसीगर्भगृहे सहेलम् ॥ २२ ॥

वहन्बहिश्चारुगवाक्षरन्ध्रै-
रामोदितान्तर्भवनस्तदानीम् ।
कपोतपक्षच्छविरुज्जजृम्भे
निर्हारिकालागुरुपिण्डधूमः ॥ २३ ॥

आताम्रकम्रद्युतिरत्नदीपै-
स्तस्मिञ्जनाः पाटलवर्णभाजाम् ।
व्याकोशमल्लीकुसुमानि धाम्ना-
मवागमंस्तन्नवसौरभेण ॥ २४ ॥

आवर्तमानः परिमन्दवृत्त्या
वातायनद्वारि चिरं विरेजे ।

कर्पूरधूलीसुरभिर्नभस्वा-
  ञ्श्वासायितस्तद्गृहदेवतायाः ॥ २५ ॥

आमेचके मञ्चकरत्नदीप्त्या
  शुक्लोत्तरप्रच्छदहंसतूले ।
स चन्दनस्थासकबन्धुराङ्गो
  देवीमुदारां रमयांबभूव ॥ २६ ॥

क्षणं स तस्या वदनारविन्दे
  जग्राह लीलां भ्रमरस्य कामी ।
क्षणं तु पीनस्तनयोर्निकामं
  जहार चर्चां हरिचन्दनस्य ॥ २७ ॥

क्षणं तया नूतनरत्नभाजा
  भुजेन कण्ठे परिरभ्यमाणः ।
कृताभ्रमुस्पर्श इवेन्द्रदन्ती
  भेजे स भावं भृशमुन्मदिष्णुः ॥ २८ ॥

क्षणं जिघृक्षुर्जघने निधानं
  नीवीधरान्तर्गतमुत्फलाक्ष्याः ।
उत्सारयामास कृतापजाप-
  स्तद्वेष्टयन्तं रशनाभुजंगम् ॥ २९ ॥

आलिङ्गनं गाढमपास्य तस्मि-
  न्दत्तेक्षणे कामिनि नाभिमूले ।

फूत्कारदुर्वारमणिप्रदीपे-
ष्वतीव सुभ्रूरकृताभ्यसूयाम् ॥ ३० ॥

निपीड्य दन्तच्छदमुद्दशान्तं
सा वेदनासीत्कृतगर्भकण्ठी ।
कचावकृष्टेन तु मल्लिकानां
दाम्ना दृशा कोपकरी जघान ॥ ३१ ॥

रतिक्रियायां विपरीतवृत्ते-
स्तस्याः स्तनाभ्यामवमुच्यमानम् ।
प्रियस्य तस्योरसि घर्मतोयं
कामानलाज्याहुतिवत्पपात ॥ ३२ ॥

ततो रजन्यां परिणामवत्यां
रतोत्सवारम्भपरिश्रमेण ।
आश्लिष्य कान्तां श्लथभावबन्धं
निद्रासुखं भूमिपतिः प्रपेदे ॥ ३३ ॥

अत्रान्तरे दन्तिनि राजवाह्ये
तद्वासगेहं समयावबद्धे ।
तत्र स्थितो हस्तिपकस्तु जाग्र-
द्बबन्ध गीतं गमकाभिरम्यम् ॥ ३४ ॥

तन्मूर्च्छनाभिः स्फुटमभ्युदीर्णं
तत्प्रौढमाभोगवता स्वरेण ।

तत्सुप्रयोगान्मधुरावदातं
    तद्बन्धुरं मालवपञ्चमेन ॥ ३५ ॥

निमीलयन्ती नयनोत्पले सा
    देवी परिम्लानतनू रतान्ते ।
आकर्णयामास सुखावहं त-
    च्चकार तृष्णामपि रक्तकण्ठे ॥ ३६ ॥

ततः प्रभाते तदभीकचित्ता
    दूतीमुपस्थापयति स्म तस्मिन् ।
सा तं निरीक्ष्यैव निवर्तमाना
    निनिन्द राज्ञीं गुणवत्यभिख्या ॥ ३७ ॥

अहो विचित्रं मकरध्वजस्य
    विडम्बनं स्तम्भितवस्तुबुद्धेः ।
देवी तु मर्त्याकृतिरुर्वशी सा
    यदीदृशं कामयते निकृष्टम् ॥ ३८ ॥

आस्यादिकं दुःसहपूतिगन्धि
    निसर्गतोऽङ्गं परिभुग्नपृष्ठम् ।
संदिग्धमक्षिभ्रुवमस्य नास्ति
    ग्रीवा शिरस्यास्तु विलूनशीर्णाः ॥ ३९ ॥

आस्यं पुनर्वायसतुण्डकृष्णं
    दन्ताश्च केचिद्बहिरन्तरन्ये ।

करावजस्त्रं करिमूत्रदिग्धौ
  दग्धव्रणक्लेदयुतस्तु कुक्षिः ॥ ४० ॥

असौ कथं नाम नरेन्द्रपत्न्यै
  रोचेत रुच्याकृतिमुद्वहन्त्यै ।
यद्वा किमेवं परिचिन्तया मे
  स्त्रीणामपात्रे हि रतिः स्वभावः ॥ ४१ ॥

एतत्स्वचेनोगतमेव दूती
  न्यवेदयत्तामुपसृत्य तन्वीम् ।
सा तां प्रति प्रत्यवदन्नतभ्रू-
  र्मुखेन कामातुरगद्गदेन ॥ ४२ ॥

वयो नवं रूपमतीव रम्यं
  कुलोन्नतिश्चेति कुबुद्धिरेषा ।
यत्र प्रसन्नो भगवान्मनोभूः
  स एव देवः सखि सुन्दरीणाम् ॥ ४३ ॥

मतोऽपि रूपातिशयस्य साध्यं
  नितम्बिनीमानसरत्नलाभः ।
तस्यास्ति चेत्तत्किमतो विचारा-
  त्कार्ये तु सिद्धे न हि कारणेच्छा ॥ ४४ ॥

तस्मादसौ मां प्रति कामदेव-
  स्तद्गीतनालीहृतचित्तवृत्तिम् ।

किं वा वयस्ये बहुनोदितेन
न तेन जीवामि विनाकृताहम् ॥ ४५ ॥

इत्थं तया दर्शितरागवृत्त्या
देव्या सनिर्बन्धमुदीर्यमाणा ।
आगत्य सा सत्वरमष्टभङ्गं
दूती ततस्तत्प्रियमन्वतिष्ठत् ॥ ४६ ॥

रात्रिंदिवं तेन यथावकाशं
सुखानि तस्याः किल निर्विशत्याः ।
दिनक्रमेणापचयं जगाहे
यशोधरे राजनि रागबुद्धिः ॥४७ ॥

आलोकनालिङ्गनचुम्बनादौ
तस्याः स्थितिं तामनवेक्षमाणः ।
बुद्ध्यैव पूर्वं परिशोधनार्थं
सज्जोऽभवच्चन्द्रमतीतनूजः ॥ ४८ ॥

आस्थाननिर्वासितराजलोकः
स सज्जितं वासगृहं प्रविश्य ।
सव्याजनिद्रो निशि दिव्यशय्यां
तयैव देव्या सममध्यशेत ॥ ४९ ॥

निद्रायतस्तस्य भुजोपगूढा-
माकृष्य देवी निजदेहयष्टिम् ।

गृहीतताम्बूलसुगन्धमाल्या
जगाम तस्योपपतेः समीपम् ॥ ९० ॥

अन्वेष्टुकामो नृपतिश्च तस्या
दुश्चेष्टितं कोशानिसृष्टखङ्गः ।
अन्वव्रजत्तत्पदवीं निगूढ-
मासन्नविध्वंस इवापनीतिम् ॥ ९१ ॥

विलम्ब्य कालं नरनाथपत्नी-
मुपस्थितां प्रत्युदितप्रकोपः ।
आकृष्य केशग्रहणेन घोरं
जघान जारः स वरत्रमुष्ट्या ॥ ९२ ॥

निकृष्यमाणा भुवि तेन पद्भ्यां
मलीमसेनाकृतविप्रलापा ।
इनस्ततोऽगात्तमसेव काले
निपीड्यमाना दिवि चन्द्रकान्तिः ॥ ९३ ॥

कण्ठे पदं न्यस्य च गाढमूर्च्छां
स तामवादीदिति सोपहासम् ।
पादौ वहेऽहं तव तन्वि मूर्ध्ना
मूका कुतस्तिष्ठसि मुञ्च शोकम् ॥ ९४ ॥

निःश्वस्य सा तं कथमप्यवादी-
दागो न मे संहर कान्त कोपम् ।

राज्ञा सहाध्यासनमेव दीर्घं
हेतुस्तु मे कालविलम्बनस्य ॥ ९५ ॥

रूपादिभिस्त्वय्यवसायिभिर्मे
तृप्यन्ति सर्वाण्यपि चेन्द्रियाणि ।
त्वं जीवितव्यं मम यावदायु-
रनादरस्त्वय्यथ किं मम स्यात् ॥ ९६ ॥

प्रत्यायितेनेत्युपभुज्यमानां
राजा स तां तेन विलोक्य कोपात् ।
आन्दोलयन्खड्गमुभौ जिघांसुः
पुनर्वितर्कं धृतिमानकार्षीत् ॥ ९७ ॥

क्षुद्रः कियानेष गजोपजीवी
न जातु नारी विकृतापि वध्या ।
सत्क्षत्रमेतन्मम तन्न किं तु
यशः परं भ्रश्यति हारशुभ्रम् ॥ ९८ ॥

अयं च युद्धे रिपुवीरघाती
खड्गः कथं क्षुद्रजने निपात्यः ।
दंष्ट्राङ्कुरं निर्दलितेभकुम्भं
न फेरवे जातु हरिः प्रयुङ्क्ते ॥ ९९ ॥

इति स्वचेतस्यवधार्य शान्त्या
निवृत्य शय्यापुलिने शयानम् ।

तं राजहंसं पुनरन्वशेत
व्यावृत्य सा देव्यपि गुप्तवृत्त्या ॥ ६० ॥

यत्तस्य गाढं परिरम्भणेच्छां
बबन्ध पूर्वं कृतरागबुद्धेः ।
तदेव तस्याः स्तनयोस्तदानीं
कार्कश्यमुद्वेजनमाजहार ॥ ६१ ॥

उदस्य तस्याः सुरतोपचारं
निद्रामिवाधिक्यवतीं दधानः ।
तत्साहसोद्वेगवना निकामं
स भूमिनाथो मनसेत्यवोचत् ॥ ६२ ॥

इयं हि सर्वावयवाभिरामा
वश्यापि कामं मकरध्वजस्य ।
कथं निकृष्टेऽपि रमेत यद्वा
मोहं विधत्ते विषयाभिलाषः ॥ ६३ ॥

रूपे मनोहारिणि यौवने च
वृथैव पुंसामभिमानबुद्धिः ।
नतभ्रुवां चेतसि चित्तजन्मा
प्रभुर्यदेवेच्छति तत्करोति ॥ ६४ ॥

इयं द्वितीया मम राज्यलक्ष्म्या
यदेवमुच्चैर्व्यभिचारभूमिः ।

कथं च तस्यां चपलप्रकृत्यां
    विश्वासमत्यन्तमुपव्रजामि ॥ ६५ ॥

तत्कामवश्यं धिगिदं मनो मे
    धिग्धिग्विभूतीरसुखप्रचाराः ।
प्रव्रज्यया तां पुनरव्ययाया-
    मन्वेषयिष्यामि हि सिद्धिकान्ताम् ॥ ६६ ॥

इत्थं परामृश्य परैर्विकल्पै-
    र्निमील्य नेत्रे नृपतिः शयानः ।
आकर्णितैर्बुद्ध इवोत्थितोऽभू-
    त्प्राभातिकैर्मङ्गलगीतनादैः ॥ ६७ ॥

कृत्वा घृतावेक्षणमुच्चकैर्गा
    स्पृष्ट्वा भिषग्भिः प्रविचिन्त्य कायम् ।
स नर्मबन्धुः प्रघणोपविष्टां
    देवीं सखीमध्यगतामपश्यत् ॥ ६८ ॥

प्रहासगोष्ठीं विरचय्य बुद्ध्या
    संक्रीडमानः स तया नरेन्द्रः ।
जघान तस्याः सुकुमारमङ्गं
    लीलागृहीतेन नवोत्पलेन ॥ ६९ ॥

तद्वेदनां सोढुमिवाक्षमत्वा-
    न्निपातयन्तीं तनुमुर्वरायाम् ।

आश्वासयंश्चन्दनवारिसेकै-
　　रवोचदेवं कृपयेव भूपः ॥ ७० ॥

अनेन रन्ध्रेषु रसच्युता ते
　　कृष्णाननेनाद्य निपीडितायाः ।
दैवेन केनापि वरं विदग्धे
　　निवारितः संनिहितोऽपि मृत्युः ॥ ७१ ॥

इत्येवमासूचितरात्रिवृत्ता-
　　मादाय वाचं प्रतिबोध्य राज्ञीम् ।
उद्वेगभूम्ना जननीसमीपं
　　जगाम राजा क्वचिदव्यवस्थः ॥ ७२ ॥

विनयविनमन्मूर्धानं सा निरीक्ष्य निजात्मजं
　　विवृतनयनद्वन्द्वेनापातुमिच्छुमिवादरात् ।
निकटविधृतं मूर्धन्यादाय चन्द्रमती तदा
　　प्रमदमधिकं भेजे भूरिस्नुतोरुपयोधरा ॥ ७३ ॥

कुलधरवनिताभिः सा सती रत्नपात्रा-
　　त्तनयशिरसि कृत्वा नव्यदूर्वाक्षतौघान् ।
इदमशिषदशेषामुर्वरां रक्ष दीर्घं
　　करधृतकरवालोन्मूलितारातिवर्गः ॥ ७४ ॥

प्रम्लायद्वदनाम्बुजे निजवधूदुर्वृत्तचिन्ताभरा-
　　न्निःश्वस्यायतमुष्णमुष्णमवनीचक्रेश्वरे तस्थुषि ।

इत्थं चन्द्रमती तदेकतनयं मोहादवोचद्वचो
दृप्तारातिविमर्दलब्धविजयश्रीदत्तकीर्तिध्वजम् ॥७५॥

इति श्रीमद्वादिराजसूरिविरचिते यशोधरचरिते महाकाव्ये

द्वितीयः सर्गः ।

॥ तृतीयः सर्गः ॥

अद्वितीयभुजविक्रम तुभ्यं
शत्रवस्तनय न प्रभवन्ति ।
निःसपत्नमपि राज्यमिदं ते
क्षारवारिपरिधौ वसुधायाम् ॥ १ ॥

अर्थिलोकजलदैरनुवेलं
गृह्यते यदपि संस्तुतिगर्जैः ।
अक्षयस्तदपि तावतिथस्ते
वस्तुकोशनिवहार्णव एषः ॥ २ ॥

पीवरस्तनभरोद्धृतहाराः
स्मेरचारुवदनाश्च तरुण्यः ।
सन्ति कन्तुरसिकस्य रिरंसोः
स्निग्धदीर्घपरिमुग्धदृशस्ते ॥ ३ ॥

हृद्यवाद्यमृदुमेदुरनादै-
    र्गायका जनमनोहरगीतैः ।
नर्तकीसरसनर्तनकेली-
    लीलया वससि चान्यविनोदैः ॥ ४ ॥

प्रौढसाधुवचनैर्गमकैः षट्-
    तर्कषण्मुखबुधैर्दृढवादैः ।
त्वं विनोदसुखमृच्छसि गोष्ठ्यां
    वस्तुवर्णकविताचतुरश्रैः ॥ ५ ॥

ग्रन्थसंगतनिबन्धनदक्षा
    रूढकर्मविभयो दृढभक्त्या ।
चिन्तयन्ति भिषजस्तव कार्यं
    दुष्टवैद्यगजकेसरिणस्ते ॥ ६ ॥

सावलेपकविवेचनशक्तैः
    सूक्तिसारसरलामृतवाग्भिः ।
त्वं विनोदसुखमृच्छसि गोष्ठ्यां
    वस्तुवर्णकविताचतुरश्रैः ॥ ७ ॥

सर्वलोकविदिताखिलवादै-
    स्तर्कशास्त्रकलया गुहरूपैः ।
प्रौढसारवचनामृतसारै-
    र्वादिभिस्त्वमनिशं सुखमेषि ॥ ८ ॥

तत्किमङ्ग वदनाम्बुरुहे ते
म्लानभावमवलोक्य दिनादौ ।
मुक्तहर्षमधुना तव वत्स
क्षारदग्धमिव सीदति चेतः ॥ ९ ॥

इत्युवाच जननीमथ राजा
देवराजसदृशो विभवेन ।
आशिषा चिरमृतंमरया ते
सर्वमेव मम देवि सुभद्रम् ॥ १० ॥

किं तु कान्तिरवमुच्य मृगाङ्कं
बिभ्रतं कुवलयोर्जितलक्ष्मीम् ।
व्यक्तमद्य तु मया निशि दृष्टा
देवि संगमकरी तिमिरेण ॥ ११ ॥

तादृशं तु सकृदप्युपलब्धं
जन्मनीह न मया स्वपतापि ।
तत्पुनर्मनसि कीलितमुच्चै-
र्दुःसहं वितनुते मम दुःखम् ॥ १२ ॥

तस्य तत्तु वचनं निजनारी-
दुश्चरित्रपिशुनं क्षितिभर्तुः ।
स्वप्नमेव परिभाव्य विमूढा
संभ्रमादिदमवोचत माता ॥ १३ ॥

अत्र वत्स वितनु प्रतिकारं
स्वप्नदर्शनमिदं खलु दुष्टम् ।
चण्डिका सपदि पूजयितव्या
सा हि विघ्नशमनी परितुष्टा ॥ १४ ॥

आविकं तनय घातय सद्य-
स्तद्गृहे तव भुजासिमुखेन ।
सा तु तेन बलिना परितृप्ता
स्वप्नदोषमचिरेण निहन्ति ॥ १५ ॥

इत्यवोचत नृपस्तु पिधाय
श्रोत्ररन्ध्रयुगलं स कृपालुः ।
देवि किं पुनरिदं तव युक्तं
वक्तुमित्थमविचारमधर्म्यम् ॥ १६ ॥

मानवस्य खलु जीवितमद्य-
श्वीनमस्य तु कृते तनुघाते ।
दुःखमात्मनि सुदुर्धरमौर्ध्व-
देहिकं कथमिवोपनयेयम् ॥ १७ ॥

प्रत्ययस्तु सुदृढो जिनधर्मे
मत्कुलक्रमभुवां हि नृपाणाम् ।
तत्र हिंसनमतीव हि निन्द्यं
नारकादिभवदुःखनिमित्तम् ॥ १८ ॥

पुत्रवत्सलतया पुनरेवं
देवि मा स्म वचनं मयि वादीः ।
इत्यनेन वचनेन सकोपा
चन्द्रमत्यथ पुनस्तमवादीत् ॥ १९ ॥

अस्तु मद्वचनलङ्घनमेत-
दस्तु ते मतमहिंसनमर्घ्यम् ।
अन्यथा तनय तर्पय देवीं
शालिपिष्टमयकुक्कुटहत्या ॥ २० ॥

इत्यनुक्षणमुदीरितवाचो
मातुराग्रहमवेत्य स दध्यौ ।
अन्यदुक्तमिदमन्यदिदानी-
मागतं तदिह किं करवाणि ॥ २१ ॥

मातुरुक्तमवमन्तुमयुक्तं
कुत्सितस्तनुभृतामपि घातः ।
हन्त केन विधिना मम चित्तं
संकटे निपतितं पुनरस्मिन् ॥ २२ ॥

चेतनप्रतिकृतावपि हिंसा
कल्पिता भवति चेतन एव ।
आस्रवो यदभिसंधिविशेषैः
कर्मणामभिहितो मुनिमुख्यैः ॥ २३ ॥

इत्यनुस्मृतविवेकरसोऽपि
 प्रेरितः सपदि मातरि भक्त्या ।
अम्बया सह महीपतिरुच्चै-
 श्चण्डिकागृहमयानयहीनः ॥ २४ ॥

अष्टमीदिवसमङ्गलवारे
 शुक्लभाजि सुतरामिषमासे ।
त्रिः प्रदक्षिणकृतो नरनाथ-
 श्चण्डिकामनमदानतमौलिः ॥ २५ ॥

तत्र कृत्रिममसौ कृकवाकुं
 चित्रसौष्ठवनिवासितदेवम् ।
देवि तृप्य बलिरेष तवेति
 व्याजघान निजखड्गमुखेन ॥ २६ ॥

किंचिदन्तरमुदीरितनादं
 लूनमस्तकमवेक्ष्य पतन्तम् ।
खड्गमुष्टिमवमुच्य शुशोच
 क्लेशकृत्खलु सतामविवेकः ॥ २७ ॥

हा हतोऽस्मि सुदृशामृतमत्या
 हा हतोऽस्मि विनयेन जनन्याः ।
हा गतोऽस्मि नरके चिरवासं
 हा गतोऽस्मि भवबन्धमजय्यम् ॥ २८ ॥

कृत्रिमः क्व पुनरेष पतत्री
क्वासिघातपरिदेवनशब्दः ।
हन्त दुर्गतिवधूरमुना मां
छद्मना नियतमाह्वयतीव ॥ २९ ॥

भावयन्निति परिप्लुतनेत्रो
राजमन्दिरमवाप्य नरेन्द्रः ।
भोगनिःस्पृहमतिर्निजपुत्रे
निर्मुमोच पृथिवीपतिलक्ष्मीम् ॥ ३० ॥

तं तपस्यभिमुखं नरपालं
बन्धकी वचनमेतदवोचत् ।
आर्यपुत्र परिहृत्य भवन्तं
कः पुनर्मम गृहे परितोषः ॥ ३१ ॥

अद्य ते सुतवरं नवराजं
स्थापयन्नृप यशोमतिमुर्व्याम् ।
मद्गृहेऽमृतमवाश्य वनान्तं
गन्तुमर्हसि मया सह पश्चात् ॥ ३२ ॥

अन्तरङ्गमवयन्नपि तस्याः
सद्म भोक्तुमगमत्स जनन्या ।
देहिनामुपगते हि विनाशे
दुर्नयोऽपि सुनयः प्रतिभाति ॥ ३३ ॥

तावुभावपि तयोपनिबद्धै-
मोदकैर्विषमयैर्मधुदिग्धैः ।
जीवितात्ययमवापतुरार्त-
ध्यायिनौ रुचिवशाद्‌तिजग्धैः ॥ ३४ ॥

विन्ध्यनामनि गिरौ स मयूरी-
गर्भवासमगमन्नरपालः ।
पालयन्त्यपसृतं पुनरण्डं
कण्टकेन शिखिनी विनिजघ्ने ॥ ३५ ॥

लुब्धकस्तु कृपयोद्धृतमण्डं
वर्धयेति स दिदेश पुलिन्द्यै ।
वर्धितः स च तया पुनरासी-
न्नृत्यवर्तुलितरम्यकलापः ॥ ३६ ॥

चन्द्रमत्यपि मृता करहाटे
कुक्कुरः पुरवरे परिजज्ञे ।
आसदत्पुनरुपायनभूतौ
तावुभावपि यशोधरभूपः ॥ ३७ ॥

यत्र तौ सकलभूतलराज्यं
दीर्घमन्वभवतां जनदृष्टौ ।
तत्र विट्क्रिमिकुलाशनकष्टं
दुर्जयो जगति कर्मविपाकः ॥ ३८ ॥

एकदा तु स निरीक्ष्य निजस्त्रीं
जारभोगसहितां निजहर्म्ये ।
जारचक्षुरुदितस्मृतिरुष्ट-
श्चञ्चुवृक्णमकरोदथ केकी ॥ ३९ ॥

मस्तके विदलितोऽमृतमत्या
सव्यथः स निपपात धरित्र्याम् ।
तं निगृह्य विचचर्व स तु श्वा
पूर्वजन्मनि तु चन्द्रमती या ॥ ४० ॥

तं पुनः प्रियमयूरविघातं
भूपतिस्तु नितरामसहिष्णुः ।
रात्रिजागरममारयदुच्चै-
रक्षदेवनकृता फलकेन ॥ ४१ ॥

तौ पुनर्नरपतिर्विगतासू
वीक्ष्य शोकमधिकं प्रतिभेजे ।
क्षुद्रतां न गणयन्ति महान्त-
स्त्वाश्रितेषु हि कृपाबहुलत्वात् ॥ ४२ ॥

कानने पृथुनि विन्ध्यसमीपे
हस्तिसिंहशरभादिनिवासे ।
तीक्ष्णकण्टकशिखः शललोऽभू-
ज्जीवितात्ययगतः शितिकण्ठः ॥ ४३ ॥

सोऽपि कृष्णभुजगोऽजनि तस्मि-
न्नीवितस्य विलये मृगदंशः ।
तं कदाचिदवहत्य जघान
प्राच्यवैरकुपितः शल्लोऽसौ ॥ ४४ ॥

तं च कृष्णभुजगाशनतृप्तं
गन्तुमिच्छुमथ शल्यकमुग्रम् ।
सत्वरं तु परिवृत्य जघान
क्षुत्प्रवेशविकृतश्च तरक्षुः ॥ ४५ ॥

शल्यकः पुनरभूदधिशिप्रं
लोहिताक्ष इति मत्स्यविशेषः ।
तीव्रकृष्णभुजगश्च बभूव
क्रूरकर्मरसिकः शिशुमारः ॥ ४६ ॥

तं तु मीनमवहन्तुमरातिं
पृष्ठतोऽतिजवतः परिधावन् ।
सोऽन्तरा जलगतां नृपकुब्जीं
प्रत्यवाप्य बिलवासमनैषीत् ॥ ४७ ॥

ईर्ष्यया स पुनरुज्जयिनीशो
धीवरैर्जलबिलादवकृष्टम् ।
ग्राहवीरमथ घातयति स्म
च्छेदभेदपरिदाहविकल्पैः ॥ ४८ ॥

मृत्युना कवलितोऽजनि सोऽजा
नत्पुरान्तरजनंगमवाटे ।
कर्मकोद्रवरसेन हि मत्तः
किं किमेत्यशुचि धाम न जीवः ॥ ४९ ॥

लोहिताक्षमपि जालगृहीतं
निन्युरन्तिकचरा नरनाथम् ।
तं विभज्य तु यशोमतिरुच्चैः
श्राद्धकार्यमवदत्कुरुतेति ॥ ५० ॥

तस्य मांसमवखाद्य च विप्रा
आशिषा दिवि यशोधरमूचुः ।
नन्विहास्ति शफरः क पुनर्द्यौ-
रित्यमन्यत स खण्डितमत्स्यः ॥ ५१ ॥

तं च मीनमतनुं वहति स्म
सैव बस्तकमजा निजगर्भे ।
यस्तृतीयजननेऽजनि तीव्रो
नीलनीरदनिभो भुजगेन्द्रः ॥ ५२ ॥

गर्भवासमपहाय स बस्त-
स्तारयौवनसमन्वितकायः ।
अभ्यरंस्त निजयैव जनन्या
कातरस्मरशारग्लपिताङ्गः ॥ ५३ ॥

तं तया रतिकृतं पुनरन्यो
बर्करस्त्वरितमेत्य जघान ।
तीक्ष्णशृङ्गशिखरक्षतकुक्षिः
कोपसंक्रमकषायितचक्षुः ॥ ९४ ॥

स्वान्त्यधातु रसवाहि स तस्या
गर्भधाम पुनरप्याभिशिश्ये ।
तस्य कुक्षिविवरे परिवृद्धि-
र्भारिणी चिरमभूदनजर्या ॥ ९५ ॥

भूपतिस्तु मृगयानधिगत्य
दुर्मनाः स विपिनादपगच्छन् ।
एकवारमविचारमाविध्य-
त्तामजास्त्रियमुदस्त्रमुखेन ॥ ९६ ॥

अस्त्रवेधविवरच्युतमुच्चै-
श्छागशावमवलोक्य कृपालुः ।
भूपतिः श्वपचमेवमवोच-
द्वर्धयैनामिति सोऽप्यववर्धत् ॥ ९७ ॥

अन्यदा महिषबल्युपहारं
भूपतिः प्रतिनिवेद्य भवान्याः ।
निर्जिहिंस सवयःपरिवारः
स्वेच्छया वनगतो मृगयूथम् ॥ ९८ ॥

तन्मृगव्यपरितोषविवृद्ध्या
चण्डिकां महिषघातमयाक्षीत् ।
माहिषं तु पिशितं द्विजतृप्त्यै
कर्मिणो रसवती परिणिन्युः ॥ ५९ ॥

आतपे प्रविततं तदवेक्ष्य
शोषणार्थमवदन्निति विप्राः ।
श्राद्धकर्मणि न योग्यमिदं य-
त्काककुक्कुरगृहीतमपूतम् ॥ ६० ॥

किं तु बस्तमुखचुम्बितमेत-
त्सर्वतः सपदि शुध्यति मांसम् ।
एवमेव खलु धर्मविचारे
नारदादिमुनयः प्रवदन्ति ॥ ६१ ॥

तद्वचांसि परिभाव्य स राजा
तं जनंगमगृहादजपोतम् ।
आनिनाय परिशुध्यति तस्मि-
न्सुपक्वसरसमांसमपाक्षीत् ॥ ६२ ॥

तद्यथेष्टमवखाद्य सहान्नं
ब्राह्मणा वचनमित्थमवोचन् ।
स्वर्गतस्तु सुचिरं सह मात्रा
तृप्तिमृच्छति यशोधरभूपः ॥ ६३ ॥

विप्रवाचमवधार्य स बस्त-
श्चेतसीदमकृत स्मृतजातिः ।
सोऽहमस्मि हि यशोधरनामा
पुत्र एष मम भूपतिरास्ते ॥ ६४ ॥

एष मे परिजनः सकलोऽपि
मन्निवासपुरमुज्जयिनीयम् ।
रत्नमन्दिरमिदं मम देवी
यत्र मामिह जघान विषेण ॥ ६५ ॥

सा पुनः क्व वनिता न मयासौ
दृश्यते मनसि यत्नवतापि ।
जारमन्दिरगता रमते नु
मृत्युवासमगमन्नु न जाने ॥ ६६ ॥

छागजन्मनि वसन्नहमद्य
घोरदुःखमिह सोऽनुभवामि ।
एष घोषयति मां तु दिविस्थं
ब्राह्मणैर्नरपतिः पितृभक्त्या ॥ ६७ ॥

इत्यनुस्मृतिसहस्रनिबद्धं
दुःखमुद्वहति बर्करवर्ये ।
सापि तस्य जनिकाधिकलिङ्ग-
मुद्बभूव विषमो हि लुलायः ॥ ६८ ॥

वाहयन्नतिभरावहपृष्ठं
तं वरिष्ठवपुषं वणिगीशः ।
उज्जयिन्युपवने निजसार्थं
वर्त्मखिन्नमथ वासयति स्म ६९ ॥

भूरिवारमवगाह्य तु शिप्रां
सैरिभः श्रमभराद्विचरन्सः ।
वारिमुक्तमवधीत्तुरगेन्द्रं
राजहंसमवनीपतिवाह्यम् ॥ ७० ॥

कोपतो नरपतिर्वणिजः स्वं
सारभूतमवलुप्य समस्तम् ।
तं लुलायमहरत्तरसा वै
चित्रकर्मविधिना विजिघांसुः ॥ ७१ ॥

कीलितेषु चरणेषु चतुर्षु
क्षारवारिपरिशोषितकुक्षिम् ।
ऊर्ध्वजानुमदहन्नृपभृत्या-
स्ते कृपाविरहिणा महिषं तम् ॥ ७२ ॥

पक्वभागमवकृत्य पुरस्ता-
द्दत्तमाशु परिखाद्य तदीयम् ।
इत्यवोचत यशोमतिमाता
नास्त्यनेन मम चेतसि तृप्तिः ॥ ७३ ॥

किं तु मे रसवतीविधृतस्य
बस्तकस्य परिखण्डितमूलम् ।
यच्छतेति मनुजाः पुनरेवं
चक्रुरेवमवदन्नपि चेत्यः ॥ ७४ ॥

पूतिगन्धि बहुभिर्व्रणरन्ध्रैः
श्छिन्नमङ्गमधुनाम्रतमत्याः ।
किंनिमित्तमथ वेयमजस्रं
मांसमत्ति नितरां तदपथ्यम् ॥ ७५ ॥

कर्म दुष्टमनया कृतमुच्चै-
स्तद्विपाकिमिदं फलमल्पम् ।
वेद्यते पुनरिहैव हि साक्षा-
त्कर्म तीव्रपरिणामनिबद्धम् ॥ ७६ ॥

अष्टभङ्गमगमन्निशि जारं
मारतुल्यमवमुच्य निजेशम् ।
मृत्युलोकमनयत्सह मात्रा
भूमिवल्लभमियं हि विषेण ॥ ७७ ॥

इत्युपात्तवचने निकटस्थे
चेटिकासदसि खण्डितबस्तः ।
इत्यमन्यत निरीक्ष्य निजस्त्रीं
क्रोधतो घुरुघुरायितघोणः ॥ ७८ ॥

तादृशं तु कुलटे वपुरेत-
त्किंनिमित्तमभवत्परिशीर्णम् ।
सत्यमेव स पतिस्तव कुष्ठी
तत्समागमकृतेयमवस्था ॥ ७९ ॥

किं विषेण मयि नोपहतेऽपि
नन्वि ते मनसि शाम्यति कोपः ।
कासरास्त्रपरिखादमतृप्ता
यन्मदूरुमपि खादसि गृद्ध्या ॥ ८० ॥

इत्यनुस्मृतिकरः स च बस्तः
सोऽपि दग्धमहिषश्च दिनेषु ।
भक्षितौ विजहतुर्नृपमात्रा
जीवितव्यमथ किं विदधाताम् ॥ ८१ ॥

तौ विमुच्य तनुमार्तमनस्कौ
कर्मणा बलवता ह्युपनीतौ ।
तत्पुरे श्वपचवेश्मनि कृच्छ्रे
कुक्कुटौ सममुपाजनिषाताम् ॥ ८२ ॥

अथ तौ प्रसङ्गपरिलोकितावुभा-
वुपनीय दर्शयति चण्डकर्मणि ।
तनयाविव त्वमभिवर्धयादरा-
दिति तं जगाद नृपतिर्यशोमतिः ॥ ८३ ॥

तरलनयनौ तारश्यामैः पतत्रपरिच्छदै-
र्वयसि दधतौ चूडारत्नं जपाकुसुमच्छवि ।
कनकनिकषच्छायाचौर्योल्लसच्चरणाङ्कुरौ
सुखमवृधतां तौ तद्वासे सुपञ्जरवासितौ ॥ ८४ ॥

राजा सोऽपि यशोमतिः प्रविलसत्साम्राज्यलक्ष्मीपतिः
कुर्वन्काव्यबृहस्पतिप्रभृतिभिः संदर्शितं मन्त्रिभिः ।
संतृप्यन्नमृतेन क्लृप्तविधिना श्रीवैद्यविद्यार्णवै-
र्ध्यानन्वञ्जयसिंहतां रणमुखे दीर्घे दधौ धारिणीम् ॥८५॥

इति श्रीवादिराजसूरिविरचिते यशोधरचरिते महाकाव्ये

तृतीयः सर्गः ।

॥ चतुर्थः सर्गः ॥

अथैकदासौ नृपतिर्मधूत्सवे
वने प्रवृत्ते कुसुमावलीसखे ।
मुदा तदात्मानमिवावलोकितुं
जगाम विस्तारितहृद्यसौरभम् ॥ १ ॥

उपेयुषस्तस्य वनं मधुश्रिया
कलक्वणत्कोकिलकण्ठनादया ।
अकथ्यत स्वागतमुर्वरापते-
र्ध्रुवं नवीनोद्गमशुभ्रहासया ॥ २ ॥

निकामतन्व्यः प्रसवैः सुगन्धयं-
स्तदा दधानास्तरवः प्रवालताम् ।
इतस्ततो जग्मुरिलापतेः स्त्रियो
लतास्तु न स्थावरतां वितत्यजुः ॥ ३ ॥

उपस्थिते पुष्पसमृद्धिविप्लवे
भयादिवाकम्पि मरुद्धरैर्द्रुमैः ।
अनल्पसंवासकृतः कृतस्वनाः
प्रपद्यतातन्वरुदन्निवाल्लयः ॥ ४ ॥

दुराक्रमांस्तुङ्गतया तु मानवैः
सुदूरमध्यारुरुहुर्लतास्तरून् ।
तदग्रभागे कुसुमश्रियः स्वयं
निवासरक्षामिव कर्तुमिच्छवः ॥ ५ ॥

निगृह्य शाखासु नितम्बिनीजने
प्रसूनगुच्छानवलूय चिन्वति ।
मधुव्रतानां ध्वनिरुद्गतोऽभव-
त्प्रवेदनाध्वान इव द्रुमैः कृतः ॥ ६ ॥

नतभ्रुवां केचिदनोकहा वने
प्रसूनशाखास्ववलम्बतां गताः ।
ततः प्रभृत्युद्भविनो विरेजिरे
वराङ्गनाङ्गा इव कल्पपादपाः ॥ ७ ॥

प्रवालशय्यामधिशिश्यिरे मुदा
लतागृहे काश्चन वारयोषितः ।
मधूत्सवासादितरागसंपदा
समन्ततः पल्लविता इव क्षणे ॥ ८ ॥

पुरो दधानः कुसुमावलीं प्रियां
प्रसूनतल्पे तरुमूलकल्पिते ।
नृपः स रेमे परितोऽवधारय-
न्वसन्तगीतं वनितामुखोद्गतम् ॥ ९ ॥

विशोधयन्व्यालमृगान्सतस्करा-
न्स चण्डकर्मा परितो वनं तदा ।
अकम्पनं नाम महामुनीश्वरं
ददर्श रम्यं तरुमूलमाश्रितम् ॥ १० ॥

उपस्थितं साधु समाधिचेतसा
मुनिं विनीतः स विनम्य पादयोः ।
अपृच्छदेवं प्रतिपत्तुमिच्छया
करोति हि श्रेयसि भव्यतागुणः ॥ ११ ॥

निमील्य नेत्रे स्थिरमासनं त्वया
निबध्नता किं भगवन्विचिन्तितम् ।
फलं च तच्चिन्तनया किमुच्यतां
न निष्फलं यच्चरितं भवादृशाम् ॥ १२ ॥

अवोचदेवं मुनिरप्युदारधी-
रवेत्य भव्यं हृदि चण्डपाशिकम् ।
अयं मयात्मा सुविविच्य भावितो
भवप्रबन्धार्णवमुत्तितीर्षुणा ॥ १३ ॥

निशम्य चैतद्वचनं महामुनेः
स चण्डकर्मा पुनरित्यवोचत ।
तयोर्न भेदः खलु देहदेहिनो-
र्मयोह्यते विस्तरतोऽद्य तद्यथा ॥ १४ ॥

निगृह्य चोरं तु निकृत्य चोच्चकैः
कदाचिदेकं परमाणुमात्रकम् ।
मया हि जीवः खलु नोपलक्षितः
पृथग्भवेच्चेति ममोपलक्ष्यते ॥ १५ ॥

तथान्यथा तस्कर एव केवलं
प्रमाय पूर्वं तुलयाथ मारितः ।
तया पुनः संमित एव तत्प्रमः
पृथक्स चेदल्पतयावतिष्ठते ॥ १६ ॥

प्रवेश्य चोरं हि महत्कुसूलकं
विलिप्य लाक्षां बहिरप्यरन्ध्रकम् ।
गते हि काले ददृशे शरीरकं
न जीवमार्गस्तदलोकमुच्यते ॥ १७ ॥

मुनिर्बभाषे शृणु चोत्तरत्रयं
तरौ कृशानुर्दलितेऽपि खण्डशः ।
न दृश्यते सोऽरणिमन्थनादृते
तथा शरीरे समुपेहि निश्चयम् ॥ १८ ॥

प्रमाय भस्त्रां तुलया पुनश्च तां
प्रपूर्णवायुप्रमितां विलोकयन् ।
प्रमाणभेदोऽत्र न दृश्यते यथा
तयोः पृथक्त्वेऽपि तथैव निश्चितम् ॥ १९ ॥

प्रविश्य रोहं पुरुषेऽप्यरन्ध्रकं
धमत्यलं शङ्खमुदात्तनादकम् ।
ध्वनिर्बहिर्गच्छति नास्ति तत्पथ-
स्तथात्र मन्यस्व विचारपूर्वकम् ॥ २० ॥

स कीदृशश्चेदयमुच्यते महा-
ननाद्यनन्तः स्वपरावभासकः ।
स्वतोऽन्यनश्चैष पुनः प्रतिक्षणं
विवर्तते हेतुफलात्मना क्रमात् ॥ २१ ॥

स एव कर्ता खलु पुण्यपापयोः
स एव भोक्ता सुखदुःखयोस्तथा ।
उपायसिद्धया परिभावितः पुनः
स एव तत्कर्ममलैर्विमुच्यते ॥ २२ ॥

प्रयोजनं तत्परिभावनाविधे-
हिंतावबोधादहितस्य वर्जनम् ।
हितं तु सम्यक्त्वमिदं तनूभृतां
प्रतीहि तेषामहितं विपर्ययम् ॥ २३ ॥

सरागसम्यक्त्वगुणैर्व्रतैरयं
सदैव बध्नाति हि पुण्यमात्मनि ।
वदन्ति सम्यक्त्वममन्दमेधसो
रुचिं तु जीवादिपदार्थगोचराम् ॥ २४ ॥

अहिंसनं सत्यमचौर्यमुच्चकै-
रकामसेवा विषयेष्वमूर्च्छनम् ।
व्रतानि पञ्चेति फलं त्वनुक्रमा-
द्विभज्य तेषामिति वर्ण्यते बुधैः ॥ २५ ॥

अहिंसनं वैरहरं परं भवे-
त्तनोति सत्यं तदमोघवाक्यताम् ।
अचौर्यमाकर्षति रत्नसंचयं
बलावहं ब्रह्मचारित्रमूर्जितम् ॥ २६ ॥

भवस्य पूर्वापरकोटिभाविनो
भवत्यमूर्च्छा व्रतिनः प्रवेदनम् ।
त्यजन्ति सन्तो मधुमद्यमांसकं
व्रतेषु पुष्टिं विधिवद्विधित्सवः ॥ २७ ॥

विविच्य सम्यक्त्वमुदीरितं मया
न तत्परं किंचिदिहात्मने हितम् ।
व्रतैर्विहीनोऽपि तदुद्वहञ्जनो
न जातु दुःखादिनिवासमृच्छति ॥ २८ ॥

इह व्रतानां तु विपर्ययैर्जनः
प्रविश्य कष्टं भवनाट्यमण्डपम् ।
विधृत्य नानाविधयोनिभूमिकां
परिभ्रमन्क्लेशमुपैति केवलम् ॥ २९ ॥

यशोधरस्तज्जननी च यावुभौ
निहत्य तौ कृत्रिमताम्रचूडकम् ।
भवेषु विभ्रम्य नितान्तदुःखिता-
विमौ तवान्ते वसतोऽद्य कुक्कुटौ ॥ ३० ॥

करोति दुःखं यदि दूरदुःसहं
वधस्तु संकल्पनया विचेष्टितः ।
किमङ्ग साक्षात्किमुतानृतादिभिः
समन्वितोऽसौ यदि सामवायिकैः ॥ ३१ ॥

विमुञ्च तद्वत्स विहिंसनादिकं
ममेदमाजीवनमित्यलं धिया ।
वदन्ति सन्तो हि यदात्मसंविदो
हिताहितादानविवर्जनं फलम् ॥ ३२ ॥

इदं वचस्तस्य निशम्य सन्मुनेः
स चाददे दृष्टिमणुव्रतोत्तराम् ।
अनुस्मृतातीतभवौ च कुक्कुटौ
ततो मुदा चुक्रुशतुश्च तावुभौ ॥ ३३ ॥

नृपस्तदानीं धनुषि स्वकौशलं
मृगीदृशे दर्शयितुं कृतोद्यमः ।
विविच्य विव्याध निनादवेदिना
शरेण तौ पञ्जरवासिनौ खगौ ॥ ३४ ॥

विमुक्तवन्तौ व्रतरत्नबन्धुरं
मनः समाधाय तनुं पतत्रिणौ ।
अधत्त गर्भं कुसुमावली तदा
मणी व गूढद्युतिबन्धनौ खनिः ॥ ३५ ॥

असूत सा तौ तनयौ तयोः पुमा-
न्यशोधरश्चन्द्रमती तु कन्यका ।
अवर्धिषातां विधुतत्प्रभानिभौ
जनस्य नित्यं नयनामृनायितौ ॥ ३६ ॥

विमुक्तबाल्ये वयसि प्रकुर्वतो-
रुदात्तविद्यासु परिश्रमं तयोः ।
नृपो वनान्ते नियमस्थितं मुनिं
निरूपयन्नेव ययौ मृगाटवीम् ॥ ३७ ॥

ततो मृगाणामनवाप्य हिंसनं
निवर्तमानो वदनेन शुष्यता ।
मृगव्यविघ्नोऽयमिति क्रुधा मुना-
वधोद्यतपञ्चशतीं स शौवनीम् ॥ ३८ ॥

तपःप्रभावात्तमनिघ्नतीं पुन-
र्विलोक्य तां तत्र विवृद्धमत्सरम् ।
स्वहस्तहिंसां कलयन्तमागतो
वणिक्कु कल्याणसुहृत्प्रसङ्गतः ॥ ३९ ॥

उपद्रवं तस्य मुनेर्विलोकय-
न्नवोचदेवं स तदा यशोमतिम् ।
महामुनौ देव नमस्क्रियोचिते
किमीदृशं कर्तुमिह त्वमर्हसि ॥ ४० ॥

दुरीहितं किं च यदत्र तत्परं
तदेव मृष्णाति भवे भवे शिवम् ।
मनस्तु नित्यं तदपि स्थिरं वह-
न्नजय्यशक्तिः शतयज्वनोऽप्ययम् ॥ ४१ ॥

अमर्षणोऽप्येष करोत्यनुग्रहं
विनिग्रहायैष भवत्यकोपनः ।
अनारतं ज्ञानसमाहितात्मना-
मलोकसामान्यमिदं विचेष्टितम् ॥ ४२ ॥

ततोऽस्य भक्त्या प्रणिपत्य पादयो-
　　र्गृहाण वाचं कृतदोषशोधनीम् ।
प्ररोचते तुभ्यमिदं हि मद्वचो
　　न चेदधस्तादवपातुमिच्छसि ॥ ४३ ॥

नृपस्तु तं प्रत्यवदत्कथं त्विमं
　　नमेयमस्नानतनुं मलीमसम् ।
कुलेन कोऽसाविति निर्णयादृते
　　वने मृगव्यस्य विनिघ्नकारिणम् ॥ ४४ ॥

वणिक्त्ववादीदयमेव सर्वदा
　　शुचिः सदाचारनिरुद्धकिल्बिषः ।
जलेन शुद्धिस्त्वपवित्रचेतसां
　　पुरीषमुष्टेर्बहिरम्बुमार्जनम् ॥ ४५ ॥

कुलेन गङ्गोऽयमनङ्गनिर्जयी
　　चिरं कलिङ्गेष्वधिरूढविक्रमः ।
सुदत्तनामा पुनरद्य तप्यते
　　तपः कुतोऽप्युद्धृतभोगलालसः ॥ ४६ ॥

मृगव्यलीलाविनिघातकारणं
　　यदात्थ देव त्वममुं तथैव तत् ।
अमुष्य धर्मप्रकृतेः प्रभावतो
　　वने न पापर्धिरिह प्रवर्तते ॥ ४७ ॥

सुहृद्वचस्तत्परिभाव्य भूपति-
स्तमादरेण प्रणनाम पादयोः ।
अमन्यतैवं शिरसैनमर्चय-
न्करोमि सद्यः परिशुद्धिमागसः ॥ ४८ ॥

मुनिश्च राज्ञः स्वशिरश्चिकीर्षतो
निवार्य हस्तेन हृदिस्थमब्रवीत् ।
सविस्मयस्तं समपृच्छदादरा-
त्पितामहादेर्गतिमुर्वरापतिः ॥ ४९ ॥

ततोऽवधिज्ञाननिरूपितं मुनि-
र्यथावदाख्यन्नृपतेर्मनीषितम् ।
पितामहस्ते तपसा स पञ्चमा-
त्परं नृपः स्वर्गमगच्छदूर्जितम् ॥ ५० ॥

स तत्र दिव्याभरणैर्विभूषितो
नवोदितादित्यनिभश्च तेजसा ।
सुखानि देवीनिवहेन निर्विश-
न्ननूनकामो रमते दिवानिशम् ॥ ५१ ॥

विषेण हत्वा निजमेव वल्लभं
तवापि माता व्यजनिष्ट कुष्ठिनी ।
मृतापि सा दुर्गतिमभ्युपेयुषी
सुदुःखिता सीदति वत्स पञ्चमीम् ॥ ५२ ॥

यशोधरस्ते जनकः पतत्रिणं
निहत्य तद्दोषवशेन कृत्रिमम् ।
बभूव केकी शललोऽथ मीनक-
श्छागो द्विवारं क्रमतश्च कुक्कुटः ॥ ९३ ॥

यशोघसूनोर्जननी क्रमादभू-
दनल्पदुःखा तत एव दोषतः ।
स सारमेयो भुजगश्च नक्रक-
श्छागाङ्गना सा महिषोऽथ कुक्कुटः ॥ ९४ ॥

ततो वनान्ते भवता निपातितौ
धनुर्भृता भूमिप शब्दवेधिना ।
विमृश्य शुद्धया कृकवाकुनन्दना-
विमावभूतां कुसुमावलीसुतौ ॥ ९५ ॥

इति स्वसंकल्पनयापि हिंसया
निशाम्य घोरं भवविभ्रमं पितुः ।
नृपः स भीतो बहुजीवघाततो
व्यधत्त वैराग्यरसाधिकं मनः ॥ ९६ ॥

तदीयपुत्रावपि तत्क्षणे गतौ
मुनीश्वरे वक्तरि तद्भवक्रमम् ।
विभक्तमन्वस्मरतामपि स्वयं
प्रबोधकप्रायभवा खलु स्मृतिः ॥ ९७ ॥

ततश्च निर्वेगपरो नराधिपो
नराधिनाथैर्बहुभिः समन्वितः ।
विमुच्य राज्यं तनये तपोऽग्रही-
द्वणिक्च कल्याणसुहृन्महामतिः ॥ ५८ ॥

पितुस्तपोविघ्नभयात्तदात्मज-
स्तदाग्रहीत्तन्नरनाथवैभवम् ।
विरक्तचेता विषयेषु दत्तवा-
न्यशोधराख्याय निजानुजन्मने ॥ ५९ ॥

ततो भगिन्या सह मुक्तमोहया
सुदत्तमासाद्य महामुनीश्वरम् ।
त्यजन्परिस्पन्दमनिन्दया धिया
विमोक्षविद्यासु गुणैरशिक्ष्यत ॥ ६० ॥

इत्थं यौ नृपतनयौ यशोमतीयौ
कान्तारे गुरुचरणावुपासिषाताम् ।
आवां तावभयरुचिं तयोस्तु नाम्ना
मामुच्चैरभयमतीमिमां वदन्ति ॥ ६१ ॥

अद्य ते नगरतो बहिर्वने
मारिदत्त वसतो महामुनेः ।
वीक्षणाय नियमादिहागता-
वग्रहीष्वहि तु चण्डकर्मणा ॥ ६२ ॥

संकल्पहिंसाजनितं तु घोरं
भवेषु दुःखं तदिदं स्मरन्तौ ।
विमुच्य बाल्येऽपि विभूतिमिद्धा-
मास्तां हि शिष्यौ मुनिपुंगवस्य ॥ ६३ ॥

क्व कृत्रिमपतत्रिणो वधविधिः क्व तद्दुःसहं
भवभ्रमणमावयोरिति मनःपरीतापिनौ ।
जिघांसुमिह जीवराशिमधुना भवन्तं पुन-
र्विलोक्य कृतविस्मयौ कृतकृपौ च वर्तावहे ॥

विरक्तिमासाद्य तु चण्डमारी
विलोक्यमाना वपुषा जनौघैः ।
ननाम युग्मं वधदुःखभीरु-
स्तदाज्ञयासादितशुद्धदृष्टिः ॥ ६५ ॥

पूजयन्तु शुचिभिः कुसुमाद्यै-
र्मामितः प्रभृति मत्पदभक्ताः ।
कुर्वतस्तु वधमत्र कुटुम्बं
नश्यतीत्यभिनिवेद्य तिरोऽभूत् ॥ ६६ ॥

देव्या तयोरर्चनया तयैव
चित्रीयमाणः सह पौरवर्गैः ।
अवेत्य तौ स्वस्य च भागिनेयौ
स मारिदत्तो नृपतिर्जहर्ष ॥ ६७ ॥

अपि च कुसुमदत्ते पुत्रवर्ये स्वराज्यं
विषयसुखविरक्तो मारिदत्तो विधाय ।
वनगतमथ ताभ्यां श्रीसुदत्तं प्रपन्नो
निरुपमविनयश्रीः संयमित्वं प्रपेदे ॥ ६८ ॥

विद्यामधीत्य सुचिरं गुरुसंनिधाने
तप्त्वा तपश्च बहिरन्तरिति द्विभेदम् ।
त्यक्त्वा समाधिविधिना तनुमायुरन्ते
देवोऽभवत्स नृपतिस्त्रिदिवे तृतीये ॥ ६९ ॥

अल्पं निजायुष्यमवेत्य तौ च
तपश्चरित्वा यमलौ यथोक्तम् ।
योगेन निर्मुच्य शरीरबन्ध-
मीशानकल्पेऽनिमिषावभूताम् ॥ ७० ॥

अमरवनितामारस्मेरावलोकनगोचरं
तरुणतरणिच्छायाचोरं तदा दधतौ वपुः ।
विषमभवनिःसारीकर्तुर्मुनेः स्मरणावहौ
परमसुखिनौ रेमाते तौ सुरावसथस्थितौ ॥ ७१ ॥

स्वर्गाधिरोहमवधार्य तयोः सुदत्ता-
द्यौधेयभूतलपतेश्च तपोबलेन ।
तद्विप्रयोगजनितं प्रविमुच्य शोकं
प्रीतिं यशोधरनृपः परमां जगाम ॥ ७२ ॥

गुरुषु विनयवृत्तिं बन्धुषु प्रेमबन्धं
रिपुषु करकृपाणं दर्शयन्नाहवेषु ।
अधिगतनयसिन्धुः सत्यसंधः स राजा
रणमुखजयसिंहो राज्यलक्ष्मीं बभार ॥ ७३ ॥

धर्म्ये वर्त्मनि तेजसा नियमयन्वर्णांस्तथैवाश्रमा-
न्वृद्धाराधनया हृषीकविजयादुत्तीर्णविद्यार्णवः ।
पारावारपरम्परीणपरमख्यातिर्नयोत्कृष्टधी-
रासेविष्ट यशोधरो नरपतिर्दीर्घं त्रिवर्गश्रियम् ॥७४।

इति श्रीमद्वादिराजसूरिविरचिते यशोधरचरिते महाकाव्ये
चतुर्थः सर्गः ।

समाप्तोऽयं ग्रन्थः ।